
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

रत्नपरीक्षा

शीर्षक - रत्नपरीक्षा (अपूर्ण)

ACC.NO. ~~6024~~ 7024. M1286

~~विषय~~ - वेदान्त

पृष्ठ - ११२

१

ख्या ६

श्रीमहागणाधिपतये नमः ॥ ॐ नमः श्रीपरतत्त्वाय ॥ पडन्वयसमुल्लसत्परमसंविदं तल्लसन्मदत्रयविभावनाविदितपादुकासत्क्रमं ॥ भजामि पर
देशिकं परचिदंबराधीश्वरं प्रकामललिताकृतिं कृतिविदां वरेण्यं विभुं १ प्रकाशवनसंहृदं सविदंतां कल्लामयीं नमो बिंदुमुखीं विदुद्धमो रोज
नतां लतां २ दुर्वासाः सत्यवासः कनकगिरिगृहं कंदरो मेरुदास्ये श्लोकाश्चैते मृगेंद्रा इति मुनिभणितां तां स्तवीं नेशति तां । ख्यात्वा व्याकर्तुमेवं कलितपरि
करस्वेदहंत स्वमनेश्वरं सोंतः प्रविश्य मुखरयति निजो दैवतलीलाविनोदं ३ नव्या कृतं किमिति पूर्वमनीषिभिस्तत् ग्रंदं गुरुरूपमिति त्वा विनिरहस्यमेतत् इत्थं
विमर्शनमपेतस्मियपरिग्रहेणलेनाहमेववतरजनिवक्रवर्त्ती ४ नो घाटितं भुवि सदागमरत्नकोशं केनापि मुद्रितमिदं मुनिना रहस्यैः उद्घाटितं सपदि ताद्दृशं तु सं
नो संतोपि भावनपरागुणहर्षणानां ५ षडन्वयपरीक्षायां व्यापरशिवस्तुतेः ॥ प्रसादुर्वाससः स्तोत्रे रामदुर्वाससो मया ६ द्वारशास्त्रप्रकरणानुपो घातः
परादृष्यं इच्छाज्ञानं क्रियाचेति कुंडलीमातृकानतः ७ साधारणं ततो ध्यानं विभूतिर्द्विविधेमतः सूक्ष्मस्थूलेंतर्यजने सत्त्वाणि पुनिवह्निरवं ८ षड
श्रोत्रभैरवः १० शार्दूलचर्मपरिधानदिगंबरं तं चंचत्कपर्दतिलकचंद्रकलावतंसं विद्रुपिणं मतिविवर्त्तितयत्नसत्त्वं वंदे महापुरुषमद्भुतचंडदेहं
११ सायं पत्करुणावलोकजलदो वर्षन्नु वरं पुत्रकं दिव्यं किं चिरवर्षदद्भुतरसं महेवकल्पद्रुमे प्राप्तदेशिकदर्शनं फलमभूत्तस्यैव नाम्नाकृता ॥

श्रा०

२

संतुष्टीतिकराः परार्वनपरा वाचो विगुंफस्त्वजः १२ प्रतिपदविभक्तस्त्वंशेषाध्याहारनिर्वचनैः भाष्यंत्र मानैर्बहुलं महदपि महनीयमेवाप्यैः १२
ऋग्वेदे कौषीतकिब्राह्मणे ॐ ऋतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतुवक्तारं मयि भर्गो मयि महो वाङ्मे मनसि प्रतिष्ठिता
मनो मे वाचि प्रतिष्ठितमाविराविर्म एध्यो भूर्वेदस्य म आणीस्थः श्रुतं मा मा हिंसीः अनेनाधीतेनाहोरात्रान्संदधाम्यग्नद्रलानम ऋषिभ्यो मंत्रकृद्भ्यो मंत्रप
तिभ्यो नमोऽस्तु देवेभ्यः शिवा नः शंतमा भव सुमृडीका सरस्वति मा ते व्योम संदृशि अदब्धं मन इषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः ॐ शांतिः ३
अथ तत्र भगवान् महाऋषिर्महाकारुणिकः परमदेशिकेंद्रो दुर्वासो भट्टारकः शिष्यानुजिघृक्षया स्तुतिव्याजेन सकलश्रुतिस्मृत्याद्यानुकूल्येन परशांभ
वसिद्धांतरहस्यानि वीहपूर्वं षडन्वयांतर्यजनेनिरूपयिष्यन् संप्रदायाविच्छित्यै सदाचारानुमितश्रुतिबोधितकर्तव्यताकं मंगलमाचरन्नाशीर्नमस्क्रियाव
वस्तुनिर्देशो वापि तन्मुखमिति माशीर्द्वारा वर्णनीयार्थबीजं वस्तु निर्दिशति ॥ अनेकशक्तिसंघातप्रकाशलहरीघनः शुद्धः संविन्मयः पायाच्छ्रीशंभु
परमेश्वरः १ ॥ श्रीशंभुः पायादित्यन्वयः श्रीरशेषविश्वप्रथाधाररूपा तयोपलक्षितः तदुक्तं वामकेश्वरसंहितायां तत्र माहेश्वरी लक्ष्मीः पूर्त्तिर्मूर्ति
मतः प्रभोरित्यारभ्य तस्मात्कमंडलाकाराशक्तिर्माहेश्वरी परा महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरेति वाजसनेयिपाठे श्रीश्च ते लक्ष्मीश्च
पत्न्याविति जैत्तिरीयके पि ह्रीश्च ते लक्ष्मीश्चेति आपुष्पस्तके श्रियं लक्ष्मीमौपलामंबिकां गामित्यादिश्रुतिसिद्धैव श्रीशाहस्यपार्वत्याहन्ति:

मामवतु

१

इत्येवासकृत्पयात् विष्णुत्वं नास्तु तावपि नमो लक्ष्मीपतये श्रीपतये ह्रीपतये नम इति पूर्वं श्रुतौ पत्न्या विति लिंगाद् रसमारणं कामेश्वरा कामेश्वरी
रूपं सकलश्रुतिसिद्धं पराविापरमेशान्त्वं ललितचरणाम्नायाधिदैवं गिरिपु नमपि भंजितं स्यात् तदुक्तं स्कांदे त्वामाश्रिता महाभागे प्राप्नुवंत्याचिरेण मां
केवलं त्वामनाश्रित्य मां भजन्नपि निःफलः नाप्नोति मत्सायुज्यं कल्पकोटिशतैरपीति वस्तुतस्त्वायमर्थः सकलश्रुत्यादिसिद्धोपपत्तिसिर्योबोढा पंच
धा रुद्रस्योपरि चेत्स्थलं शपंचेन शामिमव्ययं सुखकावि तेन ब्रह्मानंदो ब्रह्मेति व्यजानादिति एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति नित्यं विज्ञानमा
नंदं ब्रह्मेत्यादिश्रुत्युक्तरीत्या सकलरुद्रानंदसमष्टिभूतः परमानंद उच्यते तदुक्तमुत्तरचतुःशत्यां चैतन्यमात्मनो रूपं निसर्गानंदसुंदरमिति तथा च शंनिरुक्त
लक्षणमानंदं भावयतीति शंभुः मितंद्र्वादित्वात् डुः महाकल्पे नियावत ध्रुवः सत्त्वार्थत्वात्। तथा च स्मर्यते॥ ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिवि
धः स्मृत इति तथोक्तः श्रीशंभुः सच्चिदानंदस्वरूप इत्यर्थः। अत्रैव वसति। आत्मैवैषः स्वकीयो निरतिशय चिदानंद सद्ब्रह्म पूर्ण इति तदुक्तं परशुरा
मसूत्रे शिवः शंभुः परं ब्रह्म सत्यमीशान ईश्वरः एवमादीनि नामानि तानि रूपापरात्मन इति अन्यत्रैव। महेश्वरगुणानि समस्तानि महामुने॥
असाधारणया मूर्त्या नाम्ना साधारणेन च॥ वदंति परमं तत्त्वं शिवं सांबं त्रिलोचनं। त्रिमूर्तीनां हरं चैव तदंशं तस्य वैभवं। तदंशस्याभिमानं च वदंति च २
महामुने इति। तद्विग्रहास्तु यथासंप्रदायं प्रतिपन्ना अनंताः। तत्रयोगयात्तव ज्ञेयसत्ता किंक तं तेनिपतं। दृष्टिव्यां वायु मारोप्य रकारेण समन्वितं॥

2

परि४

ध्यायेच्चतुर्भुजाकारं ब्रह्माणं परमेष्ठिनं ॥ धारयेत्तं च घटिकाधारणात्सिद्धिमाप्नुयात् । वारुणे वायुमारोप्य वकारेण समन्वितं । स्मरन्नारायणं सौम्यं चतुर्बाहुं किरीटिनं । शुद्धस्फटिकसंकाशं पीतवाससमच्युतं ॥ धारयेत्तं च घटिकाः सर्वपापैः प्रमुच्यते ॥ वह्नौ चानिलमारोप्य रेफाक्षरसमन्वितं । त्रिनेत्रं वरदं रुद्रं तरुणादित्यसन्निभं । भस्मोद्धूलितसर्वांगं सुप्रसन्नमनुस्मरन् ॥ इत्यादि ॥ आकाशे वायुमारोप्य हकारेण समन्वितं । बिंदुरूपं महादेवं व्योमाकारं सदाशिवं ॥ शुद्धस्फटिकसंकाशं बालेंदुकृतशेखरं ॥ पंचवक्त्रधरं सौम्यं दशबाहुं त्रिलोचनं ॥ सर्वायुधोद्यतकरं सर्वाभरणभूषितं ॥ उमार्द्धदेहं वरदं सर्वकारणकारणं ॥ चिंतयन्नृवित्रविमस्तमुहूर्त्तमपि धारयेत् । स एव मुक्त इत्युक्तं तांत्रिकेष्वपि शिष्टैरिति ॥ एवं च श्रुतिस्मृतिसिद्धविग्रहं तं यजनेच सिद्धं विवक्षितपोदापं वधासंकेतपरिपाघा नानाविग्रहवत्वमाम्नायभेदाश्च तांत्रिकेष्वपि शिष्टैरित्युक्त्या सिद्धं । सिद्धं चात्र मुनेरिष्टं पराशरप्रभृतीनां च वैदिकतांत्रिकविधयैकमेवमिश्रारूपमिति । शिवायाश्च शिवस्यापि रूपं च यजनक्रम इत्यादि ॥ अतएव मुनिरपि श्रीशंभुरित्याह ॥ पूर्पंचपिप्पते वायमर्थं उपपूर्पपरि । तदुक्तमुपनिषदि । आनंदो ब्रह्मणो रूपमिति । सः द्वैतलक्षणं पाथिवनितां तन्मर्ज्जनां तरायकूपादपायात्मायादवतु प्रत्यानितिशेषः ॥ अपाध्यादित्यध्याहार्यं ॥ तदुक्तमभूतानंदयोगीश्वरैः । भेदलक्षणविपक्षसंकटोत्तारणं परमिहात्मरक्षणमिति । ननु संघातोऽयं स्वविषय इत्यत्राह । अनेकेति । अनेकानां जीवानां संघातः समूहः वा संघातसंचया इति कोशः ॥ संघातः शरीरमपि तथा च कोशः । गात्रं वपुः संहननमिति ॥ शक्ति शक्तो वितिधातोः मुस्तिका भावे शक्तिरिति । अत्र श्वेताश्वतरश्रुतिः । किं कारणं ब्रह्म कुतस्म जाता जीवाम केन क्व च संप्रतिष्ठाः । अधिष्ठिताः केन सुखेतरेषु वर्त्तामहे ब्रह्मविदो व्यवस्थां । ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढां ॥

र:८

४

३

यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति ॥ कूर्मपुराणेपि ॥ तमेकमेव द्रष्टारो नान्यविज्ञानसंश्रयान् ॥ किमस्य जगतो मूलमाम्नातास्मा
कमेव हि । कोपि स्यात्सर्वभूतानां हेतुरीश्वर एव हि । इत्येवं मन्यमानानां ध्यानकम्पविलंबिनां । प्रादुरासीन्महादेवी गौरी गिरिवरात्मजेति । तदुक्तं पूर्व चतुःश
त्यां ॥ परो हि शक्तिरहितः शक्तः कर्तुं न किंचन ॥ शक्तस्तु परमेशानि शक्त्या युक्तो यदा भवेत् ॥ शक्त्या विना शिवे सूक्ष्मे नाम धाम न विद्यते ॥ ज्ञानेनापि महेशानि
सर्वशर्म न किंचनेति ॥ तदुक्तं श्वेताश्वतरश्रुतौ न तस्य कार्यं करणं न विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रि
या चेति । तंत्रांतरेपि । एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले । भोगे भवानी पुरुषे च विष्णुः कोपे च काली समरे च दुर्गेति । वसिष्ठेनैव ब्रह्मादी
नां शेतत्वं वा मनया शक्तिरूपत्वमुक्तं तत्र ब्रह्मादिपंचप्रेतसिंहासनगतविभवे रित्यत्रोपरि च सर्वत्रैलिंगपुराणेपि यस्य यस्य पदार्थस्य या या शक्तिरुदीरिता ।
ता सा सर्वेश्वरी देवी स स देवो महेश्वर इति । उक्तं चतुःशत्यामपि । तदीयशक्तिनिकरस्फुरद्रश्मिसमाहतमिति ॥ तथा च तत्त्वे द्योतस्वप्रकाशस्य स्वात्मनः । त
मेव — याव मुंडकश्रुतिः ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति । अत्र बृहदारण्यकश्रुतिः ॥ तद्देवा ज्योतिषां ज्योतिरिति । अन्या श्रुतिः । त्वमेतरि
ह्वेवासि सत्ये स्त्वं ज्योतिषां पतिरिति । मुंडकश्रुतिश्च । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुरिति वा तस्य लहर्यस्ताभिर्घनो वहिरंतर्निविडः य — एम ३
था सैंधवघनः अंतर्बाह्यः सनेपि श्रुति ॥ यथा सैंधवघनः अनंतरो बाह्यः कृत्स्नो रसघन एवं वा अरे इदं महद्भूतमनंतमपारं कृत्स्नः प्रज्ञाय
नघनेति कोर्थः ॥ स्वस्य रश्मिजालमंडितपरादिमातृकांतशक्तिकदंबकरूपस्य वपुष्य हंता इदंतया दोलेव देहादिना दृष्टोऽडुस्फु(प)लं भजत्यर्थः ॥

५

व२ ई३

त३

तदुक्तं कामकलाविलासे तद्देहावयवानां परिणतिरावरणदेवताः सर्वोद्धतिरत्थं वा हन्तासंकुचत्स्वरः ॥ तदुक्तं योगिनीहृदये मेयमातृप्रमामानरश्मैः संकुचत्स्वभ
त्तिलेषु तैलं दधिनीव सर्पिरापः स्रोतस्वरणीषु चाग्निः ॥ एवमात्मानिगृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति ॥ आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिं ध्याननि
र्मथनाभ्यासाद्देवं पश्यति चात्मवानिति श्वेताश्वतरश्रुत्युक्तरीत्याईस्योपदुतिले तैलं दध्नि सर्पिरिव पः ॥ धेनावाज्यं च पुष्पामोदपुष्कलो वोपल[illegible] भ्यत इति योगधु
रिष्ठोक्तरीत्या च सद्गुरोः सद्युक्तिलब्धि विगलितमलत्रयैरेवापराविकाशमुपयासिमदा तदानीं त्वन्नामरूपगणनाः सुकरा भवन्तीत्यभिप्रकरीत्या तस्मिन्ने
वाचिरं त्वद्भीतरंगकरं स्वलयवत् शक्तिचक्रं विलीयत इत्यनुभूते बसिरूपलभ्यत इति तात्पर्यं ॥ तदुक्तमभियुक्तैः ॥ मूलाद्वंशक्तिचक्रं पतत[illegible]
[illegible] लन्मपतंगते तस्मिन्नेवाप्यपेतत्वे विलीनं परिभावयेदिति ॥ अत्रापि वसंततिलका सर्वेशश्रीपरपात्रिभुवनभवन
मक्रयः शक्रयस्त्वनंता विद्याः पराद्यानिरवधिविधवामात्रकांताः सकांताः ते विज्ञाताः स्वरूपे परि शिवगुरुणा सर्वं विश्वप्रपंचं स्वात्मज्योतिः प्रधानं विरद्ध
ति विदुषो योगिनस्तेव मुक्तिरिति ॥ पुराणादिष्वपि ॥ तस्मात्सहृतया सत्क्रया हृदि पश्यंति ये शिवं तेषां शाश्वतिकी सिद्धिर्नेतरेषामिति श्रुतिः ॥ ध्यायेदना

न

दिनिधनमानंदादिगुणालयमित्यादि ॥ कूर्मेऽपि ब्रह्मशिरो लवनपल्लवे ॥ अथान्वयप्रस्फटिरिशं मंडलांतरसंस्थितं ॥ समासीनं महादेव्या महादेवं सनात
नमिति ॥ एवं मायातनुः प्रसन्तरीयं विश्वकारणं ॥ उमासहायो भगवानिंदुमौलिरिति ॥ स्थितमेवं च ज्ञानशक्तिविवेचनेधिकृतो मायिकरूपं चनिरासे
नामः प्रत्यथवेत्पत्र निजचेतन्माद्र्द विभागोप्युपपन्नमिति शिवं ॥ नन्वेताद्दशशक्तिनिकुरंबविशेषकुरंबितस्य तस्य स्वप्रकाशत्वमपि ह्रियेतेत्याशं
प

४

क्याह॥शुद्धेति॥शुद्धजपाकुसुमोपरागापगमे स्फटिकवन्निर्मला संवित्। विद्रूपा पुरस्तादास्तां नः पुरुषार्थितुरा देहो पुरुषिकेति श्रीमदाचार्य्योक्तरीत्या स्वा
त्माहंभावसंभावनात्मा विमर्शशक्तिः॥तदुक्तं पूर्वचतुःशत्याम्॥स्वसंवित्त्रिपुरादेवी लौहित्यं तद्विमर्शनमिति॥तन्मयः अत्र स्वपरमेश्वरः यतः परमैश्वर्य्यवान्
तोऽनन्तादशविक्षेपसत्त्वेपि स्वात्मच्युतिरित्यर्थः॥तथा चाभियुक्तं॥शश्वल्लीलोल्लसल्लहरीवार्म्मबुद्बुदावलीनां प्रादुर्भावे भवति न भवः कीदृशो वा विकार इति।
अथ निखिलमन्त्राक्षरबीजभूतवर्णाक्षरपरतमाव्याख्यानां श्रीशंभुः सकलवर्णादिरकारः अत्रैव वसति। तत्त्वानां अभिव्यक्तिहेतुः सकलतिथिफलः ल्कमपुपृष्टिकां
गः स्त्रीपुंनपुंसकरूपो गुणत्रिशक्तिमहावह्निपादः षडात्मा। सर्वाभिप्रायसंवित्प्रकटितविभवत्वं महाम्नायविद्यासारस्फारस्वरूपः परपुरुषरतः सोऽस्त्यात्मा
दिवर्ण इति। आथर्वणश्रुतिरपि। अः इति ब्रह्मेति। कौषीतकिनामपि। अकारो वै सर्वा वागिति। तथा च शम्भ्वाकार इतियावत्। संविद्धि ध्यांतिपरिपंथि सक
लवर्णैकदैवकवाच्यविश्वविमर्शोपरागरूपारूपात्मा सा तु। अयं तं विशिनष्टि। अनेकेति। अनेकाः शक्तीनां प्रकाशांशभूतानां वामादीनां विमर्शांशानामिच्छा
दीनां तदुभयसामरस्यरूपाणां परस्परं साहित्यं वत्तत्राधारेषु तत्र लद लसमस्तं रूपाक वर्णैकदैवकाधिदैवतस्वरूपः। शिवचक्रमंडितानां संघाता विश्वात्म
कत्वपरिणामात्मा अस्य अत्र का अस्यात्मनः॥तदुक्तं संकेतपद्धतौ। अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिव इति॥लहर्य्यस्त्वाभिर्घनः॥ अन्योपि पूर्णाइ
वशतीयमानइत्यर्थः॥तथा च वाजसनेयिनां श्रुतिः पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते। योगवासिष्ठेपि।
अंतः पूर्णो बहिः पूर्णः कुंभ इवार्णवे। अंतः शून्यो बहिः शून्यः कुंभ इवांबरे इति। ननु चेतच्छक्तिसंध्यप्रतीतिकस्तत्स्थाने का शक्तिः स्यादित्यत्रा

शून्यः

पूर्णः१

राम. ४

७

हाभुद्वेति॥ शुद्धासितस्त्वादिकालुष्यरहितास्फुरत्तात्मरूपा विमर्शशक्तिः सर्वाभिप्रायसंविन्नु। तदुक्तं संकेतपद्धतौ। हकारोंत्यः कलारूपो विमर्शाख्यस्य कीर्तित इ
ति। गूढार्थदीपिकायामपि। विमर्शरूपिणी शक्तिरस्य विश्वगुरोः परा। परिस्फुरति सैकापि नानानामानुरूपिणीति। तन्मयः। तदुक्तं पुत्रकाचतुःशत्यां। शून्याकाराद्वि

स्फु॰ २

सर्गान्तो हृद्बिन्दुशस्पंदसंविदः॥ प्रकाशपरमार्थत्वा[illegible]रत्नालहरी सुनातु॥ प्रसृतं विश्वलहरीस्थानं मातृत्रयात्मकमिति। अत एव परमेश्वरः परमैश्वर्यं निरस्तनिखिलप्र
पंचरूपं तद्धानिमूर्धः॥ अथेदमवधेयं शून्याकारः परशिवस्तस्य हार्दवंशो भोक्तृभोग्यरूपौ सितशोणौ बिंदू तयोः प्रकाशांशस्य सितबिंदुलक्षणस्य रूपस्य श्रोणि
ते विमर्शबिंदुदर्पणे प्रतिबिंबे सति तदुभयसामरस्यशाली अकारहकाररूपशिवशक्तिमिथुनपिंडीभूतः कामाख्यो रविः श्वेतमयपीठे हंकारः श्वेतमयोनुस्वा
रात्मकस्तृतीयो बिंदुः इति फलितः॥ अत्र श्वेताश्वतरश्रुतिः॥ भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति। तदुक्तं चिद्गगनचंद्रिकायां। भो
क्तृभोग्यमयगो विसर्गगो देवि मां चिदुदधेरुदादशो॥ अर्पयन्ननलसोममिश्रणं स्तद्विमर्शइह भानुरंभसामिति। शुक्लबिंदुद्वयांतरालस्फुरितहार्दकलारू
पालहरी चेति षड्विंशतत्त्वात्मकपरिण[illegible]तिभूतविश्ववाचकवर्णज्ञानहेतुभूतमिति॥ अथ समर्थः पुण्यानंदमुनींद्रैः कामकलाविलासे स्फुटशिवशक्तिसमा
गमेत्यादिना भवति महात्रिपुरसुंदरीरूपस्तं तेन प्रपं[illegible]चितउपरिवक्ष्यते। तदुक्तं भटनानंदनाथैः॥ पुण्यानंदमुनींद्रात्कामकलानाम विश्रुता लोके इति। पद्य
प्यमर्थो मातृकारश्मिविवेचने ज्ञानशक्तिरश्मिविवेचनेचवक्ष्यते तथापि इहस्पष्टाहिसराभिमावप्रतिपद्यंनप्रपंचितोयथामतिमतिमद्भिरूह्यः॥ अत्र श्री
शंभुरूकलक्षणरूपापात्मापादनेन मोक्ष एव परं प्रयोजनं चोच्यते। तत्राधिकारिविषयसंबंधानप्याक्षिपति। मुमुक्षुरधिकारी। परशिवो विषयः। षडन्व

यांतर्भावनं प्रतिपाद्यं ॥ तत्प्रतिपादकश्चायं ग्रंथ इति प्रतिपाद्यप्रतिपादकभावः संबंधः ॥ अत्र वर्णस्य श्रीगंगालहरीघनत्वरूपसाधारणधर्मस्य च सत्त्वादुपमावा-
चकस्येवादेरुपमानस्य च मुहोरधोरत्नाद्वलुप्तोपमेयं ॥ तथा चालंकारसर्वस्वे उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमेति । अस्याश्च पूर्णालुप्तभेदाद्द्वि-
विधत्वमिति विशेषं वदति रुद्रटः ॥ रीतिश्चिन्तास्तु वर्णोपमानधर्माणामुपमावाचकस्य चा एकद्वित्र्यनुपादाने भिन्ना लुप्तोपमाष्टधेति । उपमैव सर्वालंकारबीजभूता
प्रकारवैचित्र्यादिति तस्याः प्रथमं निर्देशः ॥ परमेश्वरपदस्य वि[शे]षणत्वशंकया समानपुनरुक्तत्वाख्यो दोषो नोद्भावनीयः ॥ तदुक्तं काव्यप्रकाशे ॥ समा-
नपुनरुक्तं क्वचिन्न गुणेन दोषः ॥ यत्र न विशेषणमात्रज्ञानार्थमपि तु वाक्यांतरमेव क्रियत इति । उक्तार्थप्रतिपादकस्य हेतुत्वमावाक्यांतरत्वेन प्रतीयमानत्वा-
त् ॥ अत एव वाक्यार्थहेतुकं काव्यलिंगमपि संभाव्यते । परमेश्वरस्य पदस्य वाक्यत्वं न वेत्यन्यदेतत् । अस्तीत्यध्याहारः । यतः परमेश्वरोऽस्ति ततः शुद्धसंविन्म-
यत्वादिलक्षण इति । श्वेताश्वतरश्रुतिः ॥ एको जालवानीशत ईशनीभिरिति ॥ एकतिङ् वाक्यमिति हि शाब्दिकाः ॥ दृश्यंते ह्यस्तिभवतिमुखानां सामान्य-
क्रियाणां कारकमात्रे क्रियायोपस्थापकत्वं तच्च क्रियाविशेषनिर्वर्त्यमित्यल्पप्रक्षेपेणाप्याह भाष्यकारः । अस्तिर्भवतिपरः प्रथमपुरुषोऽप्रयुज्यमा-
नोऽस्तीति । तथा चानयोपमया रोधो जलतरंगादितादृशसंघातवाच्यो जलनिधिः परः शिवः स्वसंविज्जलतरंगादिपरादिशक्तिसंघात इति लभ्यते ।
यद्यप्यत्रालंकारे श्रुतप्रमाणालंकार एव शब्दराज्ञस्तद्विचारस्तथानोपमया ॥ तथापि यथाश्रुतं नयिष्यंते ॥१॥ अथ यद्वाभ्यां स्वस्य तादृशशंकरवराह-
वत्स्तुतिप्रवृत्तिदोषं । यथाश्रुत्यादयस्तोतुं प्रवृत्ता नेति नेतीत्येवोपरतास्तदनुमदव धिया परोक्तवमस्तु याह मपीति परिहरति । श्रीशं

मोते महिम्नस्तुतिपथचलिताः सांगवेदाः सशास्त्राः सिद्धांताः सांगविद्याः सर्वाकितगतयो नैव पश्यंति पारं ॥ सार्धं तास्त्वामनंतं परमशिवगुरुं तत्कथं
वर्णयेयुस्तस्मात्स्वानुसारादहमपि भवानस्तौमि किं विश्वचित्रं ॥ श्रीशंभुमुर्व्याख्यातः संबुद्धिस्तुस्तोदितार्थगोचरीकारणरूपसंमुख्याभ्यर्थनं स्त्वय
ति ॥ श्रीशंभोसच्चिदानंदस्वरूपे तनवमहिम्नो भूम्नः तथा च छंदोगोपनिषत् ॥ यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तदमृत
मथ यदल्पं तन्मर्त्यं स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति ॥ तस्य स्तुतेः पंथा इति स्तुतिपथः ऋक्पूरब्धूः पथामानक्षे इति समासांतः तत्र चलिताः
प्रवृत्ताः नेति नेतीत्येवोपरतानतुर्णाकल्पेनास्तुवन्तीत्यर्थः ॥ तदुक्तं महत्कविभिः ॥ महिमानं यदुत्कीर्त्य तव संह्रीयते वचः ॥ श्रमेण तदशक्त्या वा न गुणा
नामियत्तयेति ॥ भरिता इति पाठे तु गुणि अनंतत्वमभिमतमर्थस्तु स्वार्थे वा भरणीकृता इति वेति नानात्वमिति हेतुत्वाद्बहुमार्गाः अत एव शतपथ्यादि संज्ञा इ
त्यर्थः ॥ अंगैः सहिताः सांगाः शिक्षा कल्पो व्याकरणं छंदो ज्योतिर्निरुक्तमिति निघंटुः वेदाः ऋग्यजुःसामाथर्वाणः ॥ सशास्त्राः सिद्धांताश्चेति ॥ शास्त्र
नां च समाख्या स्वाणि दर्शनानि ॥ तदुक्तं पराशरपुराणे ॥ शासनाच्छंसनाच्चैव शास्त्रमित्युच्यते बुधैरिति ॥ तान्युक्तानि मुनिनैव सुंदरी महिम्नस्तुते ॥ तत्र दर्श
दि अथ शक्तिरपि च तत्त्वं ब्रह्म कर्मेश्वरः कर्ताहं पुरुषो हरिश्च सविता बुद्धः शिवस्त्वं गुरुरिति ॥ तैः सहिताः सिद्धांताः शैवपाशुपतगाणपत्यवैष्णवसौराद
यः ॥ अत्रैवव स्तौति शंभो सैद्धांतिकाये स्वमतिविभवतो गर्वगर्वाः प्रमाणैर्मीमांसंते भवंतमिति ॥ सिद्धांतः सांभवो यः शिवगुरुवदनाद्बोधवीजाग
मोक्त इति वा ॥ तेच विभूतियोगेवसंते ॥ आन्वीक्षिकी त्रयी वार्ता दंडनीतिश्च शाश्वती विद्या ह्येतास्त्वन तस्तु धर्मसंस्थितिहेतव इति वा ॥ अन्या

श्रकाव्यनाटकालंकाराणामपिकादंबोभरतादिप्रणीतानांगविद्यास्थानचकारादुभयत्रान्वेति।तदुक्तंमहाकविभिः।बहुधाप्यागमैर्भिन्नाः।पंथानःसि
द्धिहेतवः।त्वय्येवनिपतंत्योघाजाह्नवीयाइवार्णवइति।एतेनतदुभयत्वेनसंकीर्णत्वलापाच्छ्रुतिविप्रतिपन्नौदर्शनानितद्दूषितानिपात्रौसिद्धांतभेदात्संप्र
दायभेदाइति।त्वोत्तुप्रवृत्ताअपिसर्वविकितगतयःसभयाइत्यर्थः।तथाचश्रुतिः।यतोवाचोनिवर्तंतेअप्राप्यमनसासहेति।पारंपर्यंतीरंनैवपश्यंतिपा
रदर्शनेनहिविरतिःस्यान्नचतेविरताःस्तुवंतिचापरतीरदर्शनेहेतुमाह।सार्थंताइति।यद्यपिश्रुतीनांनित्यत्वं।तथापिकालपर्यायेणानुपूर्वीविप्लवः
संभवतीतिसाधंतत्वं।वस्तुतस्तु।यस्यनिश्वसितंवेदायोवेदेभ्योखिलंजगदित्यभियुक्तरीत्यानिश्वासितादेविग्रहवतएवसंभवादनित्यत्वं।तथाचवा
दनित्यत्वं।तथाचवाजसनेयीश्रुतिः।अस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेदःसामवेदइति।मंत्रश्चतस्माद्यज्ञात्सर्वहुतऋचःसामानिज
ज्ञिरेइतिमहाभारते।राजधर्मे।अष्टादशानामेतासांविद्यानांभिन्नवर्त्मनां।आदिकर्त्ताशिवःसाक्षाच्छूलपाणिरितिश्रुतिः।भूयःसभगवान्ध्यात्वावि
रंशूलवरायुधः।असृजत्सर्वशास्त्राणिमहादेवोमहेश्वरः।इत्येताःशंकरप्रोक्ताविद्याःशब्दार्थसंयुताइत्यादि।एवमन्वयः।हेपरमशिव।उक्तंश्चाम
सर्वाभिशायत्वंविद्धिसर्वशक्तिर्यस्यैवंविधशिवमुक्तिरूप।वशर्कानाविनिधानोर्थ्यत्वयेनाशीदेशाहृतिगलत्वाद्धाशिवःकल्याणकरोगुणनिक
रोस्यास्तीति।शिवः।तदुक्तंशिवपुराणे।तस्मात्सहतयाशक्त्याहृदिपश्यंतियेशिवं।तेषांशाश्वतिकीसिद्धिर्नेतरेषामितिश्रुतिः।ध्यायेदनादिनि
धनमानंदादिगुणालयमिति।श्रुतिरपि।अपिवायश्चांडालः।शिवइतिवाचंवदेत्तेनसहसंवसेत्तेनसहभुंजीतेति।ब्रह्मपुराणेपि।मद्यत्तरंनाम।

संवदेत्तेनसह१

राम
६

११

गिरेरितं नूरणामिति॥ विद्यास्तु श्रुतिरुक्तः शाहहेकादशिनी श्रुतौ॥ तत्र पंचा स्तरीतस्यां शिवइत्यक्षरद्वयमित्यादिश्रुतिपुराणागमस्तुतेत्यर्थः॥ यतस्ते साधंता॥ तत्र तोनंतं देश
का लाकारेण कलितं तडकं मुत्तरं चतुःशत्यां॥ देशकालानवछिन्नं तद्ध्येपरमं महतां स्तुतिः कलं वा सकलं नीरूपं निर्विकल्पकं॥ तत्वातीतं वरारोहे वाङ्मनोतीतगोच
रमिति॥ गुरुं स्वप्रकाशवपुषा गुरुः शिवोयः श्रीमान् इति परार्थमस्तके इत्यमृतानंदस्तुतिश्च वेराक रीत्या सकलपदार्थशिरसि द्योतमानं॥ अत्रैव तैत्तिरीयश्रुतिः॥ ईशानः सर्व
विद्यानामिति॥ अनंतं च॥ कविं कवीनामिति॥ वस्तुतस्तु पोपरिसर्वत्र गुरुं शिवमौरेकं॥ त्वां कथं वर्णयेयुः स्तुवीरन्॥ न कथमपीत्यर्थः॥ अथ प्रकृतान्वयः॥ यतः स्तुत्याद
विषयं पारं न पश्यंति॥ स्तुवंति वा॥ तस्मात्तेहमपि प्रज्ञापतेः प्रज्ञा प्रकृष्टा बोधस्तदनुसाराद्यथामति विस्तरमित्यर्थः॥ तथा च कौषीतकी श्रुतिः॥ प्राणोस्मि प्रज्ञात्मेति॥ स्वेता
श्वतरीयापि॥ प्रज्ञा च तस्मात्प्रसृता पुराणीति कोर्थः॥ न हि प्रज्ञापेताधीः किंचन प्रज्ञापयेदित्यादिश्रुतिरीत्या न सामान्यबुधवद्धिरुहहृतोहं किंतु प्रज्ञात्मप्रसादस्यानुभवस
हकृतस्तत्स्थोपि व्यंजितो भवति॥ यथाप्रज्ञं हि संभवा इति श्रुतेः॥ नैवारित्रं विस्ताहं तापरिणामलक्षणं किंचित् लेशेन स्तोमि स्तुतिव्यापारविषयं करोमि॥ अत्र हेतोर्वाक्यार्थत्वात्का
व्यलिंगमलंकारः॥ तदुक्तं काव्यप्रकाशे॥ हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति॥ न कथमपीतिगम्यमानत्वात्प्रशंसापि॥ इष्टं तस्य ग्रंथं॥ तदर्थं जनदृष्यावधि॥ तल्लक्षणं तु
॥ स्तुत्यैर्यानंतरूपेण त्रिस्तुतिपतिपुतास्वर्धराकीर्त्तिर्नेमसितिति॥ १॥ ननु तत्रात्कल्पनिपतत्स्वस्वव्यापारानियताः श्रुत्यादयस्तावत्प्रवर्त्तितां नाम तत्र तु निःप्रयोजनप्र
वृत्तिरित्याह॥ ध्वांतं नाम प्रकाशस्तव परमहिमापारपीयूषसिंधुस्त्वद्रूपा मोहमग्नाः क्व च क विमधुपा ब्रह्मविष्णुप्रमुख्याः॥ श्रीशंभो नाहमंभो
जनयति परमस्वात्मकं किमेतच्चित्रं तद्वन्मयापि स्वमतिविभवतस्तूयसे त्वं न दोषः॥ २॥ ॥ हे श्रीशंभो त्वं न नः पूर्वोक्तरीत्या परिच्छेद्यः॥ आत्मनः स्वस्य

७

प्रकाशोनिः प्रपंचाद्वास्थितिर्यस्य तथोक्तः सच नवपरः सर्वोत्कृष्टत्वात् तथा च श्रुतिश्छंदोगानां। अथ यदतः परो दिवो ज्योतिर्दीप्यत इति। महिमा महत्त्वं निरुक्तल
क्षणं स एव अपारः उक्तरीत्या वाङ्मनोतीतः पीयूषस्यामृतस्य सिंधुः सागरः तथा च कौषीतकि ब्राह्मणे। प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्स्वेति। आनंदो
नरोमृत इति नास्य केन च न कर्मणा लोको मीयते न मातृवधेन न पितृवधेन चेति। स च कृतव भक्तेः तदुक्तं कूर्मपुराणे। कृष्णद्वैपायनः साक्षाद्विष्णुरेव सनातनः।
को ह्यन्यस्तत्त्वतो रुद्रं वेत्ति तं परमेश्वरं। नार्जुनेन समः शंभोर्भक्त्या भूतो भविष्यति। मुक्त्वा सत्यवतीसूनुं कृष्णं वा देवकीसुतमिति। स च नस्यामोदः आसमंतान्मो
दयति सर्वानात्मश्रवणात्करोतिनिनिर्हारीत्यर्थः।। आमोदः सोतिनिर्हारीति कोशः।। तदुक्तं सांबेन हार्दं इति प्रथमसुदितायातमः संश्रितानां सत्वोद्रिक्तान्तःस्फुरच्च
जः कर्मयोगक्रमेण। स्वात्मस्थलाप्रथयतितरां सत्वमेव शमन्ना निर्वाणाय ब्रजति शमिनां नैकभक्तिस्त्वयीवेति। तथा च तदामोदमग्नाः पीतपारम्रषकवत्तु सर्वां
गीर्णातद्रसावगाहमंथरास्तियाबन्नु। अत एव कवयो मधुपाइव। कुडु: शब्द इति धातोर्कुन्तिन्नाः कवयः भ्रमरवदामोदमत्तायत्किंचित्प्रलपनपराः नामोदिनम
भिज्ञपंतिन च तरं ध्यानं मुंचंति मध्ये एव जल्पकाः। तदुक्तमन्यो। क्तिभंग्या स्मन्तिनाम हरचरणे: ब्रजति न सोरमलोद्भजति न च रसं वियोगतमायाः [illegible] निष्कामा
वाधिमधुकरपटलीनटलीलमानटतीति। अत एव मधुपपदमर्थांतरमपि व्यंजयति।। तेन ब्रह्मविष्णुप्रमुख्याः का। तदुक्तं शिवपुराणे। अथ शाक्तनवपुः श्रीमाकुल
सलक्षणवर्जितः इत्यादिना हरिश्चाहं च तद्दृष्टुं तथा येव सुरासुराः। तपोभिरुग्रैराघापितस्य दर्शनकांक्षिणः इति ब्रह्मवाक्यं। तत्रैव। यस्मात्सर्वमिदं ब्रह्म
विष्णुरुद्रेंद्रपूर्वकं। सह भूतेंद्रियैः सर्वैः प्रथमं संप्रसूयत इति। पाद्मेपि। को देवः परमो ध्याया नु कथं वाराध्यते हि सः।। आराधितेन फलं किं स्यादिति प्रश्नेमु

भा०४
राम:
७

९२

नी १ | या २

स्तुतिः। इममेव पुराणमंत्र दृष्टवान् विष्णुमव्ययं। सनत्कुमारो भगवानित्यादि वस्तुतस्तु मनेत्तस्य वचः श्रुत्वा विष्णुः सर्वविदांवरः। षड्वावेसुपक्रम्य विष्णुर्वचसैव। ए
कश्च शिवो ज्योर्तिर्द्विधा च बहुधा स्तुतः॥ वेदेषु च पुराणेषु सांगोपांगेषु गीयत इति। ब्रह्मांडपुराणे पि। पुरा पितामहं देवं मेरुपृष्ठे महर्षयः॥ प्रोचुः प्रणम्य देव
शंकिमेकं तत्त्वमव्ययमिति पृष्ठो नोपक्रम्य। समापयामहेशस्य मोहितो लोकसंभवः॥ अविज्ञाय परं भावं स्वात्मानं प्राह वर्षिणामिति ब्रह्मणो हंकारस्तु ऽन्को
नरस्य हमानस्य यज्ञात्मनो नारायणस्यतं इति स्वपरभावाभिमानमवताय्यैवं विवदतो र्महात्मनः परस्परजयैषिणोः। आजग्मुस्तत्र तौ देवौ वेदाश्चत्वार एव हि॥
अन्वीक्ष्य देवं ब्रह्माणं यज्ञात्मानं समूचिरे। तत्र ऋग्वेदः॥ यस्यांतःस्थानि भूतानि यस्मात्सर्वं प्रवर्त्तते। तदाहुः परमं तत्त्वं सदेवः स्यान्महेश्वरः। यजुर्वेदः। यो यज्ञैर
खिलैरीशो योगेन च समर्च्यते। येनाहुरीश्वरं देवं स एवस्यात्पिनाकधृगिति। सामवेदः। येनेदं भ्राम्यते चक्रं यदाकाशांतरं महत्। योगिभिर्विद्यते तत्त्वं महादेवः स
ईश्वरः। अथर्ववेदः॥ यं प्रपश्यंति देवेशं यतंतो यतयः परं। महेशं पुरुषं रुद्रं स देवो भगवान्भव इति। एवं स भगवान्ब्रह्मा वेदानामीरितं शुभं। श्रुत्वा विह
स्य विश्वात्मा प्रत्याह हि मोहितमिति। उत्तरत्र तत्र प्रणवेनैव स्वयं ज्योतिष्ट्वादिप्रतिपादनात्। तथा चेदं महद्विषममिति भावः। उक्तमर्थमर्थांतरेण समर्थयति
मोहेति। मुह वैचित्ये धातोः करणव्युत्पत्त्याद्यज्ञव्युत्पत्त्या स्य मोहस्य मिथ्याज्ञानलक्षणस्याविद्यारूपस्य जृंभे। जृभैनं जंभो घञंतः जृंभस्तु त्रिगुणं भणमिति कोशः।
विकाश इति यावत्। तथा च मोहस्य संरंभमतिशयेन। अस्यात्मवत्तां। स्वः आत्मा विद्यते अस्मत्वेन मे योगे स्वात्मवंतः तथा च वाजसनेयी श्रुतिः। तस्यैव
स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति। तेषां भावस्तत्ता तां न भवतितां। अनात्मत्वमित्यर्थः॥ जनयति प्रकटयति किमेतच्चित्रं किमिद

८

महत्त्वं अनालक्ष्यात्मेस्वबुद्धिप्रधानाः स्तुत्यादेरवर्णनं तदेव नात्युपमितिपर्थः। आदित्यपुराणे यथा। नयत्सदेवानपितामहो वा नेन्द्रो न वा निर्वहणेन मृत्युः। अभावम
द्यापि विदंति हृदंतमादिदेवं पुरुषो रदर्शेति। प्रपंचरंता वा यो अपि तन्वैश्वर्यमप्लाघडपरि विरिंच्यो इरिध्नः परिच्छेत्तुंयातावनलमनलस्कंधवपुषइतितदु
क्तं सांबेन। त्वां स्तोष्यामि स्तुतिभिरिति मे मनुभेदगृहोऽयं सेवा विधानदपि सुतरां तद्दुरासाय युक्तः। स्तोम्येवाहं त्रिविधमुदितं स्थूलसूक्ष्मं परं वा विधोपा
यः परइति बुधैर्गीयते तत्त्वविद्येति। योगवासिष्टेपि मलं मलेनापहारो युक्तिर्नीरजको पथ्येति। अनात्मवत्तामेवा विद्यापरिहाणा यस्तुत्यादे शट्टन्निरि
तिभावः। तद्वत् तेनस्तुत्यं क्रियाचेनिवर्तिः। यथा नेत्राकल्पेन स्तोतुमशक्ता अपि स्वात्मलाभाय स्तुवंति। तथाममापि स्वमतिविभवतद्द्रुतो। स्वमतिर्मन
नात्मिकाबुद्धिस्तद्विभवतः। अपादाने पंचमी। जनिः कर्तुः प्रकृतिरिति सूत्रे जननं जनिः। तस्याः कर्त्ता हेतुरिति व्याख्यया अंगादंगात्संभवसीतिधात्वं
नयोगे पीति भाष्यकृदिष्टेर्हेतुत्वेनापादानसंज्ञा। अपांनिवाहीयरहोरितिवृत्तिः। यथामतिविस्तरं स्वमसे स्तुतिर्गोचरः। क्रिमसेइतिनरोषः। तथापिम
प्राप्तिनवस्तुतिप्रत्तौ न दोषइत्यर्थः। अत्र पूर्वार्द्धे विषममलंकारः। तदुक्तमप्पदीक्षितैः। विषमं वर्ण्यते यत्र घटनाननुरूपयोरिति। अंते काव्यलिंगं। का
व्यलिंगमेवार्थान्तरन्यासस्तन्मते नतु। तदेवंत्र याणामलंकाराणां तिलतंडुलवत्पृथक्प्रतीयमानत्वात् संसृष्टिः। कथं वर्ण्यसेइति यत्र नकथमपीत्य
प्रस्तुतार्थलाभात् अप्रस्तुतप्रशंसापि। तत्सत्त्वाणां च स्मते॥३॥ अथ दोषपरिहारव्याजेन प्रमाणं तत्सापेक्षं वस्तुनिर्णीतिमिसं प्रतिगुरुतः शास्त्रतो नु भवे
न च निर्णीतिं प्रमाणांतरनिरपेक्षसुपोद्घातनयेन अर्पयति॥ श्रीमद्विदर्भभावे रहमहमिरमित्रात्मजं माधिरूढेनेनानारूपैः परार्थैर्नवविधविभवे सप्रदेशे

दा५
दृ५

राम॰
८

९५

प्यमानः॥सर्वातीततत्त्वमेकः। शिवगुरुचरणस्वप्रकाशाग्निरर्धो नान्यस्तत्त्वतः परोस्तीत्यहमिह गुरुणा त्वां स्वभावादवैमि॥ हे शिवगुरुचरणस्वप्रकाशाग्निरर्धो इति॥ शि
वस्य कर्मनिर्वचनः सर्वगुरुः गृणाति तत्त्वमात्मीयमात्मीकृतजगत्त्रयं। उपायोपेयमहत्त्वाय शिवाय गुरवे नमः इत्यभियुक्तोक्तेः तस्य शिवरूपत्वात्॥ तदुक्तं स्वच्छंदसंग्रहे शिवादिवि
ग्रहात्स्मरणं सर्वकारणकारणात्। ध्वनिरूपं परं तत्त्वं शुद्धं सकलतेजसां। वाग्रूपममृतं तत्त्वमुन्मनाशक्तिकेवलं। अव्यक्तं व्यक्तरूपेण निष्कलं सकारणं। परानंदस्वरूपं
तत्त्वं छंदादिपूर्वदत्तः॥ अनुष्टुप्छंदसा वध्यो शाहस्वच्छंदभैरवः॥ तद्दिर्शनपंचेन शैवागमानां। श्रितेश्वराः॥ तत्सर्वं शांत्यतीतेन शोक्थितं बहुविस्तरं। तदेतत्पररूपेण सदा
त्मेन शिवेन तु॥ पंचसिंहासनस्थेन पंचमंत्रशरीरिणा॥ कालिकादिषु सिद्धांतपूर्णाद्यखिलमागमं॥ साधनं गुरुपार्श्वस्य कौलिकं चातिकौलिकं। अस्मत्समय
मेयं च। शिवेन कथितं पुरा॥ तज्ज्ञानमीश्वरे दत्तमीश्वरेण शिवेच्छया॥ विद्यापामादितो दत्तं विद्येशाय च तत्त्वया॥ विद्येश्वरेण दत्तं तत्स्थानं नियमिकं क्रमात्। दत्तं रुद्रेभ्य
एतद्वगुणतत्त्वेश्वराय च। श्रीकंठायेश्वरेणैव दत्तं तेन ततः परं॥ श्रीकंठेन प्रधानादि दशरुद्रात्मने क्रमात्। दीक्षयित्वा विधानेन दत्तं तत्ज्ञानमांबिके। दीक्षयित्वा विधानेन श्री
कंठेन मया प्रिये। दत्तं श्रीदक्षिणे सर्वं सर्वकामार्थसाधनमिति रीत्या सृष्टिरीत्या क्रमस्य शिवमारभ्य गुरौ विश्रांतत्वात्। संहृतिक्रमेण च गुरुमारभ्य शिवे विश्रांतत्वात्तस्य
शिवरूपत्वमिति भावः॥ तस्य चरणाः पदत्रयमित्यर्थः तथा च श्रुतिः॥ त्रिपादूर्ध्व उदैत्पुरुष इति। तदुक्तममृतानंदयोगिपादैः॥ स्वप्रकाशशिवमूर्त्तिरेकिका तद्विमर्श
तनुरेकिका यतो॥ सामरस्यवपुरिष्यते परा पादुका परशिवात्मनो गुरोरिति। उक्तं च मुनिना सुंदरीमहिम्नस्तुतौ। अग्नौघैरग्निरवींदुबिंबनिलयैरंब ✓ लिंगात्मभि त्रि
स्त्रिश्रारक्तसितप्रभैरनुपमैर्युष्मत्पदैस्तैस्त्रिभिरिति। वस्तुतस्त्वत्र। त्रिचरणविमलज्ञानपूजाप्रशस्त्येति। चरणश्रुतिरपि तत्र व्याख्यास्यते। तथा च सर्वसूचितं वि

९

उक्तरूपमेव श्रीनाथपादुकाविभाग इति रहस्यं॥ एतेनात्र चरणादिदीक्षाक्रमेणैव बोधान्त्याय प्रवेश इत्यपि सूचितं स्यात्॥ अकौ भविष्यति चोपरि॥ तदुक्तं कुलार्णवे॥
बो॥ चरितार्थविका साक्षात्तच्चरणद्वयं पावति। नरनारीस्वरूपत्वाच्चरणः कथितः प्रिये॥ पालनात्तु दुरितच्छेदात् कामितार्थप्रवर्षणात्। पादुकेति समाख्या-
ता समतत्त्वं तव प्रिये इति॥ तदेवमस्वः आत्मीयप्रकाशः। स्वतन्त्रविद्यात्मीय इति कोशः॥ तथा च श्रुत्युपनिषदि न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति
कुतोऽयमग्निः। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। सूर्यादीनामाभासकत्वात् प्रमाणं तद्वस्तु चैतन्यं। तदाद्यभिभावकस्य महत-
स्तेजोंतरस्याप्रसिद्धत्वात्। किंच। तमेव भांतमन्विति सर्वस्माज्जगतः पुरो भासमानत्वमपि चैतन्यधर्मः॥ तस्य भासेति प्रकाशात्प्रकाशरूपसर्वजगद्भासकत्वं चैतन्यधर्म
एव तदुक्तं। स्वप्रकाशवपुषा गुरुः शिवो यः प्रसीदति परार्थमत्तक इति॥ तदेवं प्रथमश्लोके उपमानप्रमाणेन तद्दृष्टमेतावद्विशेषप्रमाणेन। अथानुमाने-
नापि साध्यते विश्वमिदं दृष्टसापेक्षप्रतीतिकं। दृश्यत्वात्। यद्यद्दृश्यं तत्तद्दृष्टसापेक्षप्रतीतिकं। यथा घटः। यद्दृष्टसापेक्षप्रतीतिकं न भवति तत्तद्दृश्यमपि
न भवति यथा शशविषाणमित्यन्वयव्यतिरेकसिद्धेनानुमानप्रमाणेन प्रकाश इत्यर्थः॥ अथैतां प्रमाणैरुपपत्तिं अनुप्रवेशेनैव प्रमाणत्वान्नालं तद्भावं साधयितुमि-
ति प्रमाणांतरसापेक्षतामसहमानस्तामपि स्वपदेन निराकरोति। स्वप्रकाशेति॥ तत्र स्वस्त्रयमेव सन् एकधा भवति द्विधा च त्रिधा चेति अथर्वणश्रुतिरीत्या स
एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः। शतं च दश चैकं च सहस्राणि च विंशतिरिति छंदोगश्रुत्युक्तरीत्या एकस्यैव स्वप्र-
काशः प्रतीतिर्यस्येति। प्रमाणांतरनिरपेक्षप्रतीतिक इत्यर्थः॥ अत्राभियुक्तं। अथवा लौकिकानानां मतिरेवात्र साक्षिणी। किं प्रमाणैर्वचोभिश्च स्वप्र

ना

सम०

९

५रि

काशेविरात्मनि।नाहिवैकर्त्तनंज्योतिरीर्यालोकमपेक्षतइति। अग्निश्चासौशंभुश्चेत्यग्निशंभुः सवासावग्निशंभुश्चेतिपूर्वेणसंबंधेसंबुद्धिसंबंधः। अत्रकौर्मी
श्रुतिः॥ आत्मानंवैश्वानरमुपास्तइति। श्रुत्यंतरंच। अग्निर्वैरुद्रइति। अग्निंपुराततमितिनेमविच्छारितिारुद्रोवाएषयदग्निस्तस्यैतेतनुवौघोराशिवान्येति। आवोरा
जानमध्वरस्यरुद्रमिति। वायुपुराणेहितामहाभारतादिष्वपि। किंमेभिरमरैरन्यैःपूजितैरध्वरेफलं। राजाचेदध्वरस्यास्यनरुद्रःपूज्यतेत्वया। वेदमूर्त्तस्यदेवस्यवेदज्ञाब्राह्मणा
विदुः। घोराचान्याशिवाचान्यातेचैवंशतधापुनरिति। श्रुत्यंतरंच। रुद्रोवाएषयदग्निरिति। रुद्रस्त्वामपिदधातीहरुद्रमग्निमिति। त्वामेकंशरणमुपैमिरुद्रमग्नि
मिति। [illegible] मिति। कोमेभि। वदंत्यग्निंमहादेवंतथान्येवंमहेश्वरं। एकात्मानंत्र्यंबकंचविश्वरूपंमहेश्वरमिति। अंगात्त्वंगिरसाग्निः। चिद
गगनवंद्रिकायां। दक्षिणपालशशिभानुमध्यगःखचरोत्थनलदष्टधामयः। मत्रदृष्टशिवरंपरंनभस्तत्त्वदर्शयशिवंत्वमंबिकेइति। खचरीप्रभेतिपद्यतुर्थपंतारा
मंवतवतहद्विर्वपुः। पदमादपविभागदस्मरंतान्तिरंशमवहिनवावर्हि तिमुनिनाप्युक्तमर्चनत्रिंशतिकायां। सोमसूर्यदहनेंधनोघना स्फीतविज्वलनभा
सभासुराः। दन्तिरीत्त्यागतिरूढ्वेनमायत्रभातिनकिमेतदर्चनमिति। ताकामत:श्रुतयोप्यग्निमेवसर्वदेवानांमुख्यत्वेनगृणन्ति। अग्निर्मुखंदेवतानामिति।
अग्निर्वैतुप्रथमोदेवतानामिति। अग्निःवैसर्वादेवताइति॥ राजानौएतौदेवतानांयदग्नीषोमौरस्मादि। यथाग्निर्देवतानांस्वादुतुंनांकुसुमाकरःद्विपदांब्र
ह्मणःश्रेष्ठइत्यादयः। स्तनयोपिउत्तरशास्त्रपुरोगमाइत्यादिपुराणोक्त्या। अग्निर्देवतेतिजैमिनिसूत्रमपि। अभिमुखीकृतस्तोकस्वप्रकाशव्यवस्यापकं
देवतार्थंविशेषयति॥ श्रीमदित्यादिना। श्रीहकृतलक्षणसर्वाभिप्रायसंविदशेषाधारप्रख्यातद्विरतस्वदृश्यभावैःदृश्यःसाक्षात्कृतुंएकः।भा

१०

वः स्वभावोऽपेयं तथोक्तेः। ग्राह्यस्तु भावैरित्यर्थः। भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मास्तीति कोशः। तत्र हेतुगर्भं विशेषणं। अहमहमित्यादिनित्यबोधस्ययोरिति द्वि

त्वमहंकारस्य गुणत्वेनैतुष्टकारत्वनेनेति। इति श्कारेणात्पर्थः। तथा च श्रुति बीजस्येनेपिनां। सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत् सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्तस्मा

दप्येतर्ह्यामंत्रितोऽहमयमित्येवाग्र उक्त्वाथान्यं नाम प्रब्रूते यदस्य भवतीति। इदमिति चाध्यस्तं ममत्वविषयः। तदुक्तं तत्रैव। स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीय

मैच्छदिति। योगवासिष्ठेपि। अहंकारांकुरो जन्मदृष्टरोगोऽहमसत्यमात्मनां। ममेदमिति विस्तीर्णास्तस्य शाखा ह्यसत्फला इति। अथवाहमहमिति योगवासिष्ठोक्तो राजससा

त्विकोवाहंकारा विलासास्मदादिगोचरत्वात्। तदुक्तं तत्रैव। अहं सर्वमिदं विश्वं परमात्माहमव्ययः। इत्येकः सर्वस्माद्व्यतिरिक्तोऽहं बालाग्रशतकल्पित इति द्वितीयः।

पादकुलिपादादिमात्रोऽहमपामित्येष निर्णय इति तृतीयः। तत्र प्रथमौ द्वावहंकारावंगीकृत्यात्मा लौकिकौ। तृतीयाहंकृतिस्त्याज्या लौकिकी दुःखदायिनीति।

वसिष्ठवाक्यस्मृतेः। देहाहंकारस्त्वंतक इति। व्यात्मजंमाधिरूढे इति। तथा चाहमहमिदमिति यात्मनो निरुक्तलक्षणास्योक्तलक्षणात्मभासुरत्वात्सर्वाभिप्राय

संवित्। तदुक्तं पुनश्चतुःशत्यां। यदास्य परमा शक्तिः स्वेच्छया विश्वरूपिणी। स्फुरत्वात्मनोनः पश्येदित्यादिना नानाधिरूढेः। तथा भातेत्यर्थः। अत्र प्रमाणं। देश

कालपरिच्छिन्नमप्यद्वस्तु यथा यथा। तत्तद्रूपेण या भाति तां वंदे संविदं कलामिति। अत एव नोह्यपेः तथा बोधयमीश्रुतिः। तदैक्षत बहु स्यां प्रजायेयेति। तत्तेजोऽसृ

जतेति। तैत्तिरीयश्रुतावपि तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधी

भ्योऽन्नं अन्नात्पुरुष इति। अत्र यद्यपि प्रोक्तश्रुतिषु सामान्यतः कारणपरत्वेनैव प्रतीयते तथापि अथास्य पुरुषस्य चत्वारि स्थानानि भवंति। नाभिः हृदयं कंठं

म३

नै

राम

१०

त

तपु

मूर्द्धि वा तत्र चतुष्पादं ब्रह्म विभाति जागरिते ब्रह्मा स्वप्ने विष्णुः सुषुप्तौ रुद्रस्तुरीयमक्षरं तद्वादित्ये विष्णुश्चेश्वरश्चेति त्रिभ्योपि परमक्षरं प्रतिपादितमिति ब्रह्मोपनिषदि पुनस्तत्रैव। न तत्र देवा ऋषयः पितर ईशते इति श्रुत्वा। एको देवः सर्वभूतेषु गूढ इत्यंतर्यामित्वं। तापनीयेपि। अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये तदुपर्योंकारं सर्वेश्वरं द्वादशांत इति परलोके त्वं मैत्रेयोपनिषदि च तमो वा इदमेकमासेति श्रुत्वा तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरित्यत्र तमसः सत्त्वोत्सत्रिरपि। भागवतेपि। स्थित्यादये हरिविरिंचिहरेति संज्ञा इति। ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तय इत्यादिवचनैस्तुरीयं दर्शितं। तस्य चोमासहितं उक्तलक्षणं वपुश्च उमासहायं परमेश्वरं प्रभुं अनंतमस्तं परं ब्रह्मेत्यादिकैवल्योपनिषदादिमंत्रेभ्यः प्रतिपन्नमिति जगत्कारणत्वे न विवाद इति सिद्धं। मुनिस्तूपपत्तिब्रह्मादीनां तच्छ इदकमृते तत्त्वं निरूप्यानंतरशक्तिमयात्परशिवादेवादेवतच्छक्तिस्फुरत्तोद्रेकस्य कार्यं त्विदमिति कारणतां समर्थयिष्यति। वस्तुतस्तु नेव तत्र तत्रश्रुतयः। समग्रेणच कारणेन पारतत्त्वकारणतायाः एवं समर्थनीयत्वात्। वस्तुतेवस्त्वक्लश्रुतीनां परशिवपरत्वं विभूतियोगानेनेत्यलं पल्लवेन। निरवधिविभवेरिति। निरवधिरपरिच्छेद्यः विभवो येषां। नद्वर्क्षमहाकविभिः श्रुतसोप्यपरिच्छेद्यो महादिमहिमा न वा। आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथेति। परार्थैः शिवादिक्षित्यंतषट्त्रिंशत्तत्वात्मकतया परिणतैः। प्रागुक्तप्रमाणानीत्या परसंविदुल्लसित इत्यर्थः। करणे तृतीया। आशु अप्यनेव्याप्तो नियद्यानत्यादेदीप्यमानः दीप्यदीपधानार्धशार्धेपिडि- भुत्पन्नः। अयमर्थः। स्वविमर्शशक्तिपरसंविदुल्लसितविजृंभितक्षित्यादिषट्त्रिंशत्तत्वजन्य ‑णपरिणतिविश्वरूपनिजरश्मिवृंदैः दीपकत्वेनातिशयेन प्रज्वलमान इति। अत्र महोपनिषच्छ्रुतिः। तस्याः शिखाया मध्ये परमात्मा व्यवस्थित इति वक्ष्यति चात्र मुनिः।

20

पार्वतस्त्वेमपूरकाः क्षितिजलदहनस्पर्शनाकाशचेतः पीठस्थाः षट्चक्रनाडीगं परममधिपतयो भैरवाख्य वसवेः तेषां मध्ये त्वमेवापरतरमहिमोज्ज्वभ्रू
माणः पूर्वं षोडशान्तं गोरश्मिमध्यस्थितस्त्वपरितो भासि चिद्दूरवाम्येइति। अत्र ज्वलनं तु यत्र यत्र मिलितामरीचयस्तत्र शत्रिभुरेव भंजते इति स्तोत्राणुक्तरीत्या नाद्दू
मर्शनहृद्ये तदुक्तं विज्ञानभैरवभट्टारके। यत्र यत्र मनो याति सर्वाह्यर्भ्यंतरं विषेपे॥ तत्र तत्र परावस्थाव्यापकत्वात्प्रकाशस्यति। तत्र तत्रात्मार्गेण वैतन्यं व्यज्यते प्र
भोरिति वा तथा चात्मा मनसा सं युज्यते मन इंद्रियेणेंद्रियमर्थेनेति तंत्रांतरोक्तरीत्यात्मैव तत्र तत्र स्वरार्थीकारेण विद्यासहायः सकलप्रपंचात्मक इति तात्पर्यं
तथा च श्वेताश्वतरश्रुतिः। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति। माया वा विद्या उभयेऽप्यनिर्वचनीयत्वादिगुणसाम्यादिति श्री विद्यारण्यस्वामिनः।
तदुक्तं शिवपुराणे। सैव सा पराशक्तिर्देवी विद्येति कीर्त्यते इति। भेदको विशेषस्तूपरि षट्त्रिंशत्तत्वविवेचने स्फुटीकरिष्यते। न च मायाया अंगीकारे द्वैतापत्तिः। वास्तवस्य
द्वितीयस्याभावात्। कार्यकमव्यवस्थापकत्वं तत्त्वविद्यागतनानाशक्तिविशेषायत्तं। ननु आरंभाधिकरणे यतो वा इमानि भूतानि जायंते येन भित्तत्प्रयंतीति श्रुत्युक्त
रीत्या कार्यकारणयोरभेदः प्रतिपादितः स च वैशेषिकादिवन्नात्रोपयुक्त इति क्षीरदधिन्यायेन परिणामस्त्वंगीकारे शेषे चीभूवैनित्यत्वमंशे सावयव
त्वं प्रसज्येतेति चेन्न। इंद्रो मायाभिः पुरुरूप ईयत इति श्रुतेश्च स्वगणमायाशक्तिर्जगद्रूपत्वपरिणामः। नन्वसौ वास्तव इति प्रश्नविकल्पानवकाशः॥
तदमायिकस्य शरीरित्वप्रसंगतः। यथाकथमपि हेतुं विना मायाव्याप्तता कार्यहेतुस्तथा शरीरमते ष्यस्तु। प्रमाणं तु श्रुतिं मायिनं तु महेश्वरमित्यवोचा
मा आनंदो ब्रह्मेति व्यजानात् आनंदाध्येव खल्विमानि भूतानि जायंते। आनंदं प्रयंत्यभिसंविशंतीति भृगुवल्ल्यादिश्रुतिश्लोकरीत्या नित्यस्तन्मयः। एवं च सर्वत्र

द

राम

२२

29

त्वनित्यत्वमात्मानादिबोधत्वस्वतंत्रत्वनित्यमलुप्तत्वानंतशक्तित्वानीत्यंगषट्कं शक्तिसामर्थ्याद्धिताहितफलभोक्तृ...त्वविकभेदाभेद वैषम्यादिदोषशंकापिनेति

सकलोपनिषदां सिद्धांतं सर्वांतेनिधायाह। सर्वातीतं इति। यद्यपि सत्यज्ञानानंदलक्षणाभिस्तंतुनाभस्व वरेत्। यथाग्नेः क्षुद्राविस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्रा

णाः सर्वे लोकाः सर्वे देवा इति। यतो वा इमानि भूतानि जायंते यमभिप्रयंतीत्यादिश्रुतिरीत्या सृष्टिहेतुत्वेनास्य पूर्वोद्भाविता हेयशंका तथापि सत्यं ज्ञानमनंतं ब्र

ह्मेति। सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति। नवा वै विजिज्ञासीत वक्तारं विद्यादित्यादिश्रुतिरीत्या सर्वदृश्य

प्रपंचमतीतः। शाखा वंद्यमानेन तस्य तत्त्वमकत्वात्। तदुक्तं शिवगीतासु। नित्यो विशुद्धः सर्वात्मा निर्लेपोहं निरंजनः। सर्वधर्मविहीनश्च न ग्राह्यो मनसापि वै। ना

हं सर्वग्रहेपि यावोक्तः समनाशक्तिः स्वहृद्वैदो त्मना स्थितः। नात्र कालकला भानं न तर्कं न च देवता। श्रुतिर्मा लं परं तत्वं रुद्रवक्त्रं तदुच्यते। शिवशक्तिरिति ख्याता नि

र्विकल्पा निरंजना। तत्वातीतं परं स्फोटे हवा मनोतीत गोचरं। श्रुतिरूक्तं वा सकलं नीरूपं निर्विकल्पकं। निर्द्वंद्वं परमं तत्वं शिवाख्यं परमं पदमिति। अत एकत्व

मस्ति। तथा च सोधाम्न कांडे श्राथर्वणश्रुतिः। एक एव हि विश्वात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचंद्रवत्। कठवल्ली श्रुतिरपि। अ

ग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्यः। एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेति। श्वेताश्वतरोपनिषदपि। यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति। क्षरं प्रधा

नममृताक्षरं हरः क्षरात्मनावीशते देव एकः। संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीश इति च। शिवराघवसंवादेपि। य एकः शाश्वतो देवो ब्रह्म

३ रूपं

न

22

१२

वंधः सदाशिवः त्रिलोचनो गुणाधारो गुणातीतो हरो ऽव्ययः। जानाति स्वज्ञानस्याथ वीत्यात्मस्वं गुणत्रयं वेदत्रयमिदं ज्ञेयं गुणत्रयमिदं हि यत्। पृथक्कु
रुत्वात्मनस्त्व द्वितत्त्वसारं विभज्य वा दक्षिणेनास्तजं तु त्रं ब्रह्माणं वामतो हरिं। पृष्ठदेशे महेशानं नीलग्रानस्तुजत्यधुरिति। एतेन कवितु दृपदेनाप्युपस्थि
तिर्येगणरुत्क्वैव। एवं कश्चित्त्रिगुणानामसमतमस्प्रत्यष्टिरर्शनमपि तत्समेव सेयं। तन्नाम्नाम पितैथैव निर्वाहात्। सर्वश्रुतिषु ब्रह्मविष्णुमाहेश्वर्येण गुणि
हृद्रस्यापि पाठात्। प्रपंचपिष्यन्तेचोपरि। नान्यस्त्वत्तः परोऽस्तीति। त्वत्तोऽन्यो ऽपरः उत्कृष्टो नास्ति। त्वदितरस्य प्रपंचात्मकत्वात्। अत्र श्रुतिः। एकमेवाद्वितीयं
आ। ५ ब्रह्म नेह नानास्ति किंचनेति। नत्वव्यपैत तु कुतो निरीतिमह इति पुंगाहमिह त्वां इति प्रकर्षार्थः। गृणतेत त्वमात्मीयमित्याद्युक्तरीत्या त्वद्रूपेणैह तु नागुहणाह
मिहास्मिन् संसारे स्वभावात् स्वसत्तया वा भिकोर्थः। गुरुकरुणाकटाक्षाविशीर्णावरणजालो तत्र एव परिस्फुरन्तमशिवाहं भावो हं स्वसत्ता विजृंभितमेवेत द्रखि
लमनुभवामीति। विस्तरभयान्नेह प्रपंच्यते ऽयमर्थः। प्रथमपद्यस्यापि कारणं प्रश्ने विनियोजनीयः। तदेवं मुनिना सकलोपनिषत्प्रमाणरीत्या तत्सर्वं संक्षेपतो विवेचि
तं। श्रुतिः स्मृतिः सकलोपनिषदः स्तोत्रव्याजेनोपदिष्टा इति स्तोत्रं तेन सदृक्स्तुषः हनिग्रह गृहीतमुनिविग्रहो भगवान्। सर्वासामुपनिषदां दुवा साज
मतिदेशिकः प्रथम इति। उदात्तमलंकारः। तथा च लक्षणं। समृद्धिमद्वस्तुवर्णनमुदात्तं। अंगभूतमहापुरुषचरितं चेति। अत्र गुरुणा मया वैभीतिपदेनाकरुणा
त्कर्णोपदेशेन संप्राप्तमवनीतले। एतत्त्वानंदमालच्यमकमाण मगोवर मित्यादि व्यंजितमपि स्यात्। ४॥ तदेवं तत्परं विविच्य प्रत्येकं न तु पदं हन्ति
वांस्त्वमहं तं इति कथं तवेत्त्वभावेन परिज्ञानमिति शंकापरिहरणव्याजेन तत्त्वमसिपदार्थौ विवेचयति॥ आत्मैवैषः स्वकीयो निरतिशयचिदानंद

दुहित १

रम.
१२

सद्ब्रह्मपूर्णेति सः संसारभोवेरनिडउधिगमैरानमायाविलासैः सर्वात्मत्वादनंतसत्त्वशिवमहसः श्रीगुरोः सत्यवाक्यैर्निरस्तोपाधिबोधैः परमपुरुष तेतत्पदं
तमेति॥ हे परमपुरुषेति। परमः सर्वोत्कृष्टत्वात् पुरुषत्वं तु स्वकीयात्मनोपीत्यस्य परमत्वं। पुरि शेते पुरुषः। अत्र वाजसनेयिश्रुतिः॥ आत्मैवेदमग्र आसीत्पुरुष
विध इति। स यत्पूर्वोस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष इति वा। तदुक्तं लैंगे। यस्मात्पूर्यनुशेते च तस्मात्पुरुष उच्यत इति॥ चिद्गगनचंद्रिका या मयि विश्व
समनिविदात्मनीश्वरे पूर्णत्वमुपैति। अत एव पूर्णः परिच्छेद्यत्वात्। तथा च श्रुतिः। पूर्णमदः पूर्णमिदमिति। वा नित्यत्वात्सत्वाद्यंगसामर्थ्यात् पूर्णः। तदुक्तं स्कांदे।
पुरुषो नाम संपूर्णः शिवः सत्यादिलक्षणः। तां वमूर्तिं धरो नान्यो हरो विष्णुरजोपि चेति। निरतिशयचिदानंदसद्ब्रह्मेति॥ अतिशयो विशेषस्तस्मान्निष्क्रांतः सामान्यमिति
यावत्। तादृशो यश्चैतन्यात्मक आनंदः। अत्र वाजसनेयिश्रुतिः। अथ ये शतं प्रजापतिलोके आनंदाः स एको ब्रह्मलोक इति। एतस्यैवानंदस्यान्यानि भूतानि मा
त्रामुपजीवंतीति। नित्यं विज्ञानमानंदमिति वा। तद्रूपमनृतमेव सत्। अत्र छांदोग्यश्रुतिः। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति। अमृतमित्यर्थः। तथा
च बृहदारण्यकश्रुतिः। स यदाहासतो मा सद्गमयेति मृत्युर्वा असत् सदमृतमिति। निर्विशेषचिदानंदामृतपूर्ण इत्यर्थः। ब्रह्मार्द्दहिवृद्धाविति धातोर्बृंहणाद्बृहत्त्वाद्ब्रह्म।
तदुक्तं वैयासिकतंत्रे। आत्मैव ब्रह्मेति। ननु ब्रह्मणः कुतः परिच्छेद्यत्वमित्यत्राह। विभुरित्यादिना। अनंतः कोउपेक्षितो मायां तु प्रकृतिं विद्यादित्युक्तश्रुतिरिन्माया मायाप्
या अविद्यमाहेतुनाविलासो जन्ममरणे येस्मैरतस्य डउधिगमैः दुःखेनाधिगंतुं शक्यैरितिरित्यर्थः। संसारस्य संततेरभावैः परार्थैर्यमातप्रमाणानैर्निर्ममः संकु
चितः। निह्नमूर्तिर्निमत्कुंचितमिति कोशः। तदुक्तं। येयमातप्रमाणानपसरैः संकुचत्वभमिति। तदुक्तं कुसुमांजलौ मिति। सम्यक् परिच्छे [illegible] त्रिस्तद्राचेयमा

१२

मा[illegible]तेनगात्तद्योगव्यवच्छेदः आत्मा एवं गौतममतेइत्यपि प्रयमर्थः॥ निष्कलत्वं ब्रह्मैवार्यं मायाविलसितं जन्मभेनैमा प्रमेयादिभिः परिछिन्नत्वात्तदुक्तमभियुक्तैः॥ जातोऽहं जनको ममैष जननी क्षेत्रं कलत्रं कुलं पुत्रा मित्रमरातयो वसु बलं विद्या सुहृद्बांधवाः। चित्तस्पंदितकल्पनामनुपतन्न विद्वान विद्यामयीं निद्रामेत्य विघूर्णितो बहुविधान् स्वप्नानिमान्पश्यतीति। वाजसनेयिश्रुतिरपि। सो वेदहं वाव सृष्टिरस्म्यहं हीदं सर्वमसृजीत्याद्या

द्वि॰ ४

त्मा एकत्वेऽनेकत्वशंकीति निराधरत्याह। सर्वात्मेति। सर्वस्य शिवादिस्थावरपर्यन्तस्य विश्वस्य। एको वशी सर्वभूतांतरात्मा एकं बीजं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषामिति शिवगीतायां भगवदुक्तेरित्यात्मत्वात्। यस्मिन् द्यौः पृथिवी चांतरिक्षमोतमिति मुंडकोपनिषदुक्तेरित्यासूत्रतया वा एवं तत आत्मांतर्याम्यमृतमिति वाजसनेयिश्रुतेरित्यंतर्यामितया वा अतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे। छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेता इति कठवल्लयुक्तेरित्याह। हेतौ पंचमी। घटाकाशादिवदुपाधिभेदात्परिच्छिन्नतया प्रतीयमानत्वादनंत इत्यर्थः। एष इति। एतदः समीपतरार्थत्वादात्मनस्तस्य वा संभवादाह। स्वकीय इति। स्वस्यायमिति स्वार्थे गहादित्वाछ्छ स्वजनपरयोः कुरु चेति सुत्पन्नः। आत्मीयतया देहाध्यवसायात्स्वपदं योगपरिच्छेद्यतापदं। आत्मैवेति। यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह। यच्चास्य संततो भावस्तस्मादात्मेति कथ्यत इति व्युत्पत्तिः स्मरणादात्मोत्पत्तिश्चात्मैवाऽत्रतीति संस्थिति सरलरूपमात्मत्वमनार्थीदतथा नोर्मनि सुत्पन्नो जीव एवेत्यर्थः। तदुक्तमभियुक्तैः। एकोऽपि कृधा तेषु विश्वबनिवेशितः स्व चेष्टितमयो नास्मिन् विरुध्यातिमरणाद्विवेति। मुंडकश्रुतिरपि। द्वा सुपर्णा सयुजा सखाया विति। अत्र वाजसनेयिश्रुतिः। प्र स्तर्तप्रा धी

जीवत्मयाऽनंत॥ ५

एत

त्ति ३

२५

ह्मः न्यत्रात्मनोऽद्वैतेदृति॥ सत्स्वनान्यः अत्र कठश्रुतिः। येन रूपं रसं गंधं शब्दान् स्पर्शांश्च मैथुनान्। एतेनैव विजानाति किमत्र परिशिष्यते॥ स्वप्नांतं
जागरितांतं चोभौ येनानुपश्यति। महांतं विभुमात्मानं मत्वा धीरो न शोचति। इत्यादिश्रुतिसिद्ध इत्यर्थः॥ नन्वस्तु जीवशिवयोरापेक्षिकोऽद्वैतभ्रमः
अकृते किमित्यत आह। नचेति शिवेत्यादिना॥ शिवपदस्यार्थो यो वा चितया मुक्ते स्वरूपो विधेयतया पवर्गः॥ स्वः श्रेयसं शिवं भद्रमिति॥ मुक्तिः कैवल्यनिर्वाणश्रे
योनिःश्रेयसामृतमिति कोशः॥ तथा च शिवमहं कटमानमेयाद्यावरणरहितं महत्तेजो यस्यानुदर्के। स्वप्रकाशवपुषा गुरुः शिवइत्यादि। इष्टणशंकाभयंल
ज्जाजुगुप्सा चेति पंचमी॥ कुलं शीलं च जातिश्च अष्टौ पाशाः प्रकीर्तिताः इत्यभियुक्तोक्ताष्टपाशतिमिरभारनिकृंतनेन परशिवाहंभावभावनासंभावनया स्वात्मज्योतिः म५
प्रकाशनेन मुक्तिरूपपरमप्रकाशरूपस्येत्यर्थः॥ श्रीगुरोरिति। श्रीः शिष्यगतपश्वाकारपाशपाटनेन शक्तिपातजृंभणोल्लासितरूपानयोपलक्षितस्य गुरोः गृणति स्वा
त्मानमीश्वरीकृत्य तद्रूपत्वं शिष्यायेतितस्य तव निस्तर्कोपाधिबोधेरिति। तर्कोपाधयपश्चतेभ्यो निःक्रांतः निरावयः क्रांता ध्येयं पंचम्येतितस्तुरूपः तर्कावेल
क्षणादयः। तथाहि कथमशरीराद्वृक्षणः सशरीरमुत्पद्यतेऽस्ति। कथं सचेतनात् चेतनोऽस्ति रित्याद्यः संशयस्सैव पर्यायरूपाः उपाधयस्तु हेतुवद्भासमानत्वाद्धे
तू त्वाभासाः यथा अचेतनमिदं चेतनान्न जायते। विलक्षणत्वात्॥ यद्येन विलक्षणं तत्तस्मान्न जायते। यथा गोमहिषः। विमतं घटकादिकं। स्वतो न्यूनपरिमाणारब्धं। मा
कार्यत्वाद्यथा तंतुभिः पटइति। विमतं भावरूपं जगदभावपुरःसरं। भावरूपत्वात्। यथा सुषुप्तिपुरःसरः स्वप्नप्रपंचः इति हेत्वाभासास्तर्काः वैशेषिकादिनयेनुय
यासंशयस्तथा तर्कोपीति। सच व्याप्यारोपेण व्यापकारोपः। यथा यद्यग्निर्न स्यात् धूमोऽ(पि) न स्यात् परिभ्रमजन्यत्वं विभ्रमस्याभिन्नत्वं स्यादिति लक्षणः। उपाधिस्तु

२६

म५

१४

पंचसु हेत्वाभासेष्वेकस्य प्रकारान्तरं तत्‌ यथा। साध्याभिमतव्यापकत्वे सति साधनाव्यापकः। यथा चैत्रः श्यामो मित्रातनयत्वात्‌। यथा घटः। अत्रानुमाने शाकपाकजत्व
त्वमुपाधिः। यथा च कार्य्यं कर्तृजन्यं। कार्य्यत्वाद्यथा घटः। अत्रानुमिते शरीरजन्यत्वमुपाधिः। उपाधीयंत इति स्वस्य समा स्फटिके जपाकुसुमोपरागादिव स्वद्वारानुमिति
दूषकाउत्सर्थः॥ तद्रहितः यथा। कार्य्यकारणयोः सलक्षणत्वव्याप्तेरचेतनाऽऽमयाद्वृश्चिकाद्युत्पत्तेश्चेतनात्पुरुषात्केशाद्युत्पत्तेर्व्यभिचारः। अत्र मुण्डकश्रुतिः। यथा
पृथिव्यामोषधयः संभवंति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमिति। न्यायवादिभिर्यो न्यूनपरिमाणात्‌ महत्त्वनियमः कृतस्स विवर्त्तवादेः
म५ सत्वात्‌। हराक्षिरवरिशिरवाग्रवर्त्तितरुजालं ह्रस्वीकृशल्यपश्यत्रमपि जनयति। यदृष्टभावपुरःसरमनुमानं तत्रापि साध्यविकलो दृष्टान्तः सुषुप्तेरवस्थात्वेनावस्थावत्‌
तन्न आत्मनः स्वरूपस्य क्रोडीकरणीयत्वे सति स्वभावपुरःसरत्वात्‌॥ इति प्रकारान्तरकोपाधिदूरीकरणात्‌॥ अत्र कौथुमी श्रुतिः। यथा सौम्यैकेन मृत्पिंडेन सर्वं
५ मउअं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमेवं सौम्य स आदेशो भवतीति। यथा देवदत्तस्य शैशवयौवनवृद्धत्वादयस्तथा मृदो विकाराः संस्थान
घ विशेषाद्घटशरावकरद्योदञ्चनाद्याकारप्रतिभासदशायामपि मृन्मात्रमेव वस्तुतत्त्वं वस्तु। न तु वागमेयघटादीनां नानात्विकस्वरूपाणामिति। न च तादृशं कुतर्कैर्वी
ण स्तु विश्रान्तानुपपत्त्यो विभावनीयः। अत्र कठश्रुतिः। न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः। अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात्‌ पम
त्‌। नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ। यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नाचिकेतः प्रष्टेति। तदुक्तमाचार्यैः॥ यत्नेनानुमितोऽप्यर्थः कुश १४
लैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपाद्यत इति। न खलु पुराणादिषु पूर्वैक्रायविनोक्तकौटपाधयः केनापि प्रसंगेनोद्भाविता नापि चेदृशी सृष्टिप्रक्रिया

प्रेष्ठा २

ख्यानाः श्रुत[illegible]यः वक्ष्यति च श्रुतिरपि विभूतियोगे दिव्यान्नापानिरूक्ता निजनिजनि मतिस्फुर्त्तयः सर्वविदः सांगोपांगाच्छ्रशास्त्राण्यधिगतविभवान्यन्यास्तिष्ठांत वि
द्याभाषाः स्वार्थैर्वि भांति चिन्मयतो दिश्यमूर्तेः परः कइति तथा च स्वार्थहस्ताश्रुतीनामपि कुंठै तत्त्वे केमी वराकामाखादमरइति शिवं। वक्ष्यते चान्यत्र विनियोग

मुंड ५

राम
२६

99

रूपं वितः॥ एवमन्याभिरपिताश्चोत्रवसंते॥ छंदोग

संवद्धानामपि मंत्राणां विनियोगांतरेपि न दोष इति स्तोपपत्तिवाजसनेयिका एवते त्तिरीयश्रुतिभिरपि बद्धवश्रुतित्रितिपादितं त्राणाः संबद्धमेवानुसंधेयो विभे
दतस्मादेकाकी विभेतीति एवं सयथास्त्रीपुंमांसौ संपरिष्वक्तौ स इममात्मानं द्वेधापातयदित्युपक्रम्योपास्यत्रात्मरूपदेवताभेदा एव संनिरूपिताः॥ तैत्तिरीये त्राणो
पनिषदा चक्रवासना पूर्वमुपास्तिः प्रदर्शिता॥ कंठादिभिरप्यग्नित्वेनायमेवार्थः [illegible]ः॥ श्वेताश्वतरीयेपि देवात्मशक्तिं निरूप्य चक्रवासनापूर्वमेवात्र विव
क्षितोर्थः॥ स्फोटितः॥ एवमन्याभिरपिताश्चोत्रवसंते॥ छंदोगश्रुतावपि॥ एवोड्रा॥ वितस्यैव प्रज्ञात्मनः प्रतीकत्वेनोक्तोपासोपास्त्यादिस्यो पास्तिगायत्र्युपास्तिरखिलोपा
स्तिः संवर्तोपास्ति [illegible] श्वारणोपास्तिरिति निरूपणपूर्वं सर्वस्य व्यवस्थापितः॥ अथर्वोपनिष दस्त्वपि क्वचिन्नारायणोपि त्रिस्यादि क्वचिद्धि घावि
घे क्वचित्स्वक्त त्रिपुरुषैक्क्वचित्तांवशिवं क्वचिन्मायामालिनस्तरां क्वचिद्वैतस्य विभक्तिः क्वचिन्नादविंदु क्वचिद्धंसपरमहंसौ क्वचिन्नारायणादयः क्वचित्परापरे क्वचित्र
मः प्रकाशो क्वचिदग्निशिखे क्वचिदात्मपरमात्मानौ क्वचित्प्रणवः क्वचिद्भुवनत्रयं क्वचिल्लोकाः क्वचित्तत्त्वानि तदुपरितनाः स्वपितदीपविभूतित्वेन नृसिंहकालाग्निरुद्र
मुख्यादर्शनविधानि रूप्य सौभाग्यकांडे प्रथमतः कौषीतकिब्राह्मणोपक्रांतः प्रज्ञात्मैवोपहंसमावुपास्यत्वेन वक्तुमिष्टस्तत्र काश्चित्स्वपेत्रापापराभिधावागेति त्रिपुर
सुंदरी प्रश्नेति॥ शौनकोपनिषद्यपि॥ मंदं तिकामालिनी मंगलावत्सुभगावत्सा सुंदरी॥ शुद्धरूपेति॥ श्वेताश्वतरश्रुतावपि॥ प्रज्ञाचनस्मात्स्रसतापुराणीति॥ एवं श्रुतिभिर
भिनुतेति॥ हंमनतस्तुनेत्यर्थः॥ तथाचाथर्वशिरस्यु सौभाग्यकांडे पराभिधा भगवती त्रिनिलये विलये धाम्नि महसा घोरे लभ्या प्राप्नोति सैवेयं भगवती त्रिपुरेतियापद्य
तइति॥ ननु तैत्तिरीये आत्मन आकाश इति वियदादीनृष्टिति स्रष्टृत्वमुक्तं॥ छांदोग्ये तत्तेजो सृजतेति तेजः प्रति॥ ऐतरेयके स इमान्लोकानसृजतेति लोकान्प्रति॥ मुंड
के एतस्माज्जायते प्राण इति प्राणादीन्प्रति॥ एवं न केवलं कार्यद्वारा विरोधः कारणस्वरूपोपन्यासेपि॥ सयथा छांदोग्ये सदेव सौम्येदमग्र आसीदिति सद्रूपत्वं तैत्ति

पा २

५४

२

ऽयेपि सद्वाइदमग्र आसीदिति। ऐतरेयपक्षे चात्मा वा इदमग्र आसीदित्यात्मनः। अतः कार्यकारणविप्रतिपत्तेर्नैकस्य कारणत्वोक्तौ श्रुतिसमन्वयः। अस्तु तर्हि शाखाभेदेन श्रु
तीनामप्यन्योन्यभेद इति चेत्। सत्यं। भवतु तर्हि नीयेषु विप्रसादिषु तत्त्वमेव विवादः। आकाशादीनामनन्तस्यार्थविषयत्वात्। तदुपन्यासस्तु हेतावबोधाय। तात्पर्यविषये जगत्स्रष्टृ
त्वलक्षणेन कापि विप्रतिपत्तिः। कचित्सच्छब्देनोक्तस्य ब्रह्मणोऽन्यत्रात्मशब्देनाभिधानं सर्वज्ञीवस्वरूपत्वविवक्षया। असच्छब्देन कचिदभिधानं त्वव्याकृताभिप्रायेण तत्त्वस्य
नाभावाभिप्रायं। श्रुत्यंतरे कथममुतः सज्जायेतेत्यभावकारणतानिषेधात्। न हि श्रुतेः परस्परं विप्रतिपत्तिः। एकस्या एव श्रुतेः शाखाभेदेनानंत्यस्य दृश्यमानत्वात्। त
स्मादेकवाक्यतया सुसंपादो विषयहेतुत्वसमन्वय इति शिवं। प्रकृतमनुसरामः। ननु केवललक्षणया कुत्रानुभावनीयेत्याह। वक्रराजेति। वक्राणां राजा इति वक्रराजः। राजा
हः स्विस्पष्ट इति समासांतः। वक्रराजत्वं चास्य सकलप्रणवार्णश्रेष्ठत्वात्। वक्रराजो ह्यर्थवत्प्रमाणसौभाग्यकांडश्रुतिर्ध्वनिता भवति। श्रीचक्रमित्यर्थः। तत्रास
नं पंचधा योगवर्गसंकेते सदाशिवाख्यो महाप्रेताख्यो वा महाविंदुः। तदुक्तमाम्नायरहस्ये। वैंदवासनसंस्थं बिंदौ यद्वात नवचक्रराजे आसनानि सुधार्णवादीनि साध्या
नि ह्यासनं तानि षट्। तत्रस्थाइति योगविभागात्। तदुक्तं रूपरीवहस्ये हितार्था। पडाननषट्काणइति। साधारणक्रमेतु विंदावध्याधावाच्चैवं षट्कोणमेवव सति। तत्क्रमस्य पुनर
न्यभिष्टत्वोपमर्दनीयत्वेपि परं वस्तुनि ताद्दगात्रेप समनुष्ठेयत्वं नाधिकृतत्वात्। फुल्लारुणमन्नाम्नानाच ग्रणरूपस्य पुष्पदंतस्य स्वस्वरूपस्य मुनेश्च गृहकलहः। अथ मत
एवनोद्भावितस्तथापि तत्क्रमस्यावसरे व्याख्यानत्वापश्चिक्रमपरिभावायोद्भावयिष्यते। तदुक्तं कल्पार्णवे। चिन्मयस्याप्रमेयस्य निर्गुणस्याशरीरिणः। साधकां
नां हितार्थाय ब्रह्मणो रूपकल्पना। लिंगस्थंडिलवह्न्यप्सु हृच्चक्रिजुपटेषु वा। मंडले फलके मूर्ध्नि हृदि वा दश कीर्तिताः। गवां सर्वगतं क्षीरं मध्यैकत्र संस्थि
ते। तथा सर्वगतो देवः प्रतिमादिषु राजते इति। तत्रैवर्देवस्य मंत्ररूपस्य मंत्रे व्याप्तिं ज्ञानतां। कृतवमादिकं सर्वं व्यर्थं भवति शांभवि। मंत्रं मंत्रमयं प्रोक्तं देव

तिर्दि

२० वै

५२

नामंत्ररूपिणी॥ यंत्रे सा पूजिता देवि सहसैव प्रसीदति। कामक्रोधादिदोषोत्थसर्वपापनियंत्रणात्॥ यंत्रमित्याहुरेतस्मिन्देवः प्रीणाति पूजितः॥ शरीरमिव
जीवस्य दीपस्य स्नेहवत्प्रिये॥ सर्वासामपि देवानां तथा यंत्रं प्रतिष्ठितं। तथा यंत्रं लिखित्वा प्रध्यात्वा वा साष्टतिथिं वा ज्ञात्वा गुरुमुखात्सर्वं पूजयेद्विधिना
प्रियेइति। अथैतदुत्पत्तिः सौभाग्यकांडे अथर्वशिरसि। देवा ह वै भगवंतमब्रुवन्महाचक्रनामचक्रनायकं नो ब्रूहि सार्वकामिकं सर्वाराध्यं सर्वरूपं विश्वतोमुखं मो
क्षद्वारं यद्योगिन उपविश्य परं ब्रह्म भित्वा निर्वाणमुपविशंतीति तान्होवाच भगवान् श्रीचक्रं व्याख्यास्यामइति त्रिकोणमस्तारं कृत्वा तदंतमध्यवृत्तिनीं मानपट्टिकं
त्वा विलोनीत्वा ग्रतो योनिं कृत्वा पूर्वयोन्यग्रहृत्पिणीमानपट्टिं कृत्वा सर्वार्धिनीं त्वा त्रिकोणं योनिचक्रं भवति द्वितीयमंतरालं भवति तृतीयमष्टयोन्यंकितं भवत्यथ
ष्टारचक्राद्यं वह्निकोणाग्रतो रेखां नीत्वा संध्यायमध्यरेखां नीत्वा तेन वसुदलसंपुटमान्यंकितं कृत्वा कर्णाभ्यष्टधुगरेखां चतुष्टयं कृत्वा यथाक्रमेण मानपट्टिकयेन द
शयोन्यंकितं भवत्यनेनैव पुनर्दशारं चक्रं भवति मध्यत्रिकोणाग्रचतुष्टयादेरेखाचतुष्टयं दूरं शाराद्यकोणेषु संयोज्यांतर्दशारांततो नीत्वा रेखां योजयित्वा चतुर्दशारं चक्रं
भवति ततोष्टपत्रसंहरणचक्रं भवति षोडशार्कचक्रं भवति पार्थिवं चतुर्द्वारं भवत्येवं सृष्टियोगेन चक्रं व्याख्यातमेतन्नवात्मके चक्रं प्रतिलोमेन व्यावस्थितिसंहारक्रमेण
पुनरत्रोधस्तिहृदिष्टेति। उत्तराचतुःशत्यामपि॥ पंचशक्तिचतुर्वह्निसंयोगाच्चक्रसंभवः। स्तुपक्रम्य चक्रस्य त्रिप्रकारत्वं कथितं परमेश्वरि। सृष्टिस्थितिनवयोन्यादि पश्चात्
संहृतिः पुनः पृथ्व्यादिनवयोन्यंतमितिश्च स्वस्य निश्चयइति। तच्छास्त्रं पूर्वचतुःशतीतंत्रयथा॥ शक्त्याशक्तिं विनिर्भिद्य भूयो वा च्छुरेणतेद्रस्तुत्रपक्रम्य। चतुर्वर्गा
रसमायुक्तमेवंस्याच्चतुरस्रकं। संस्थितात्र महाचक्रे देवी त्रिपुरसुंदरी यंत्रमुपसंहृतिः तल्लरूपं तु क्रमशिष्यके यथा॥ बिंदुत्रिकोणवसुकोणदशारयुग्ममन्वस्र
नागदलषोडशकर्णिकारं। वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रमेतदुदितं त्रिपुरांबिकायाइति॥ आचार्यास्तु पितुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिः

×मारूप्योर्ध्वविस्तार्य योनिसंपुटं कृत्वा ततो मध्यचतुष्टयकर्णाभ्यां रेखाचतुष्टयं×६

श॥

५४

२८ पित्राभिन्नाभिः शंभोर्नवभिरिति मूलप्रकृतिभिः ॥ चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयत्रिरेखाभिः [illegible] सार्द्धं तव शरणकोणाः
परिणता इति ॥ मूलप्रकृतेर्नवधात्मप्रथनेरिरांसा ॥ नवरित्वीरेखजनेनगुणानवानतरिणानवभूमङ्ग्नाः ॥ यस्मिन्निदं विश्वमोतं वतस्मादन्यन्नपरं किंचनास्तीति ॥ यो
गवासिष्ठेपि ॥ एवं वेधेन परामृष्टं शांतं तत्वत्रयं नवमम् ॥ नत्वं विदधविदधासमस्तीह कुलनो भिन्नं । समुदेति ततस्तस्मात् कलाकलनरूपिणी ॥ एषैव संस्थितिं जेतोरसाः
पारंपरं ॥ अत्रैव तेत्रयः प्रोक्ता गुणास्तेपि त्रिधामताः ॥ नवधेयं विभक्तेयमविद्या गुणरूपिणी ॥ अथ चक्रराजवासनाः उक्ता चतुःशतानि ॥ परमापरमा शक्तिः स्वेच्छया णी

णी गुणरूपिणी स्फुरत्तामात्मनापश्येत्तदा चक्रस्य संभवः ॥ शून्याकाराद्धि सर्गान्ताद्विंदुप्रस्पंदसंविदः ॥ प्रकाशपरमार्थत्वात् स्फुरत्तालहरीयुतात् ॥ प्रसृतं विश्वलहरीस्था त्
नं मातृत्रयात्मकं ॥ बैंदवं चक्रमेतस्य त्रिरूपत्वं पुनर्भवेत् ॥ धर्माधर्मौ तथात्मानो मातृमेयौ तथा प्रमा ॥ नवयोन्यात्मकमिदं चिदानंदघनं महत् ॥ चक्रं नवात्मकमिदं
नवधा भिन्नमंत्रकं ॥ बैंदवासनसंरूढं संवर्त्तानलचित्कलं ॥ अंबिकारूपमेवेदमष्टारस्यं स्फुरच्चं ॥ नवत्रिकोणस्फुरितप्रभारूपदशारकं ॥ शक्त्यादिनवपर्यंतदशारणस्फुरत्त्रि
कारकं ॥ भूततन्मात्रदशकप्रकाशनलंबनत्वतः ॥ द्विदशारस्फुरद्रूपक्रोधीशादिदशारकं ॥ चतुश्चक्रप्रभारूपसंविद्विपरिणामतः ॥ चतुर्दशाररूपेण संविद्विन्निकरणात्म
ना ॥ वेवप्यादिजपंतात्मप्रमात्रर्थप्रथामयं ॥ एवं शक्त्यनलाकारं स्फुरद्रौद्रीप्रथामयं ॥ ज्येष्ठारूपचतुःकोणं वामरूपभ्रमित्रयमपि सुप्रकम्पानादादिनवशक्तिमय
तां निवर्त्यादिपंचकलात्मकतां मूलाधारात्तंतदाद्यन्तमपंतं महाबिंदौ च सकलनिःकलनिकलभेदे ॥ द्विधा विभावनं पारादिवाक्चतुष्टयमयं ताप्यपारादीनामेव का
मरूपादिपीठचतुष्टयमयतां पारादीनामेव कामरूपादिपीठचतुष्टयमयतां पारादीनामेव कामरूपादिपीठचतुष्टयमयतां पारादीनामेव वेकामरूपादिपीठचतुष्टयमय राम॰
तां पीठेषु लिंगचतुष्टयस्थितिं ॥ अथैतेषां मंत्रवाच्यतया विद्यादेवतपीठानामैक्यविभावनं जाग्रदादिवृत्तिचतुष्टयमयतां चैतेषां मुद्रावासना ॥ त्रलिवक्रं सृष्टिस्थि २८

५५

× त्रिके त्रिके त्रिके प्रत्येकं सख्यात्मकतां चांतर्निरूप्यत्रैलोक्यमोहनादिनामसंके ×१

निलयात्मकत्वं त्रिकैतोत्तरं॥ अत्र पूज्या महादेवी महात्रिपुरसुंदरी। परिपूर्णं महाचक्रमजरामरकारकं। स्वयमेष महाचक्रसंकेतः परमेश्वरि। कथितः। त्रिपुरादे
व्यातीवमुक्तिप्रवर्तकः स्वपरंहतं॥ श्रीमकोपनिष्पन्नपीतिः स्थःपुरस्त्रिपथ्याविघ्नवर्षिणी मया कथ्या अस्तरहन्ति विद्या॥ अधिष्ठायैनामजरपुरासी महत्त्राम
हिता देवतानां। नवा योनिचक्राणि दीपितिः। न चैव योगा नव योगिन्यः एवं श्रृंजयेत्। नवानां चक्राधिनाथा स्तोतानवभद्रा महीनां। एकाभ्यासी प्रथमा सा
नवो हीरासोनविंशोता॥ स्तोनविंशत्रिंशः चत्वारिंशत्तात्तत्रतिस्तः समिद्धाया उपनीरिव मातरो मा विशंतु। ऊर्ध्वं ज्वलज्ज्वलनं ज्योतिरग्नेतमो वैतिरश्चीनं
अंचकं तद्भ्रो भूत। आनंदनं मोदनं ज्योतिरिंदोरेता वात्र पेव मंडलं मंडयंति। यास्तिस्रो रेखाः सदनानि भूर्भुवस्त्रिविष्टपा गुणास्त्रिः प्रकाराः। एतन्मर्द्धर्कप्रकाणाम्
त्रिपथतो मरतोमरन्याद्सादिना॥ वसंते वनेत्विरीपकंठध्वेताध्वतरारिस्मितयःकुंडलिनी स्कंधे वक्रवल्मीकवर्त्तीत्यत्रचक्रवासनायां॥ अयमेवार्थः पुरुषानंदमुनीं
द्रैः मध्यं चक्रस्य स्यात्सरामयं विंदु तत्वमेवेदमित्यादिना॥ भूविंबत्रयमेतत्स्वरूपं त्यादि त्रिमात्र विश्रांतीत्यंतेन कामकलाविलासे निरूपितः॥ ननु चक्रराजमहाश्रीनगरसा
म्राज्ञीसापराहपैव श्रीमद्राजराजेश्वरी महात्रिपुरसुंदरी श्रीचक्रराजस्य समर्हणीया नान्ये चेतिचेन्न। वैखरीमयसकलसमकोटिमहामंत्रवर्णज्ञान व्याप्या सा सर्वोपेया
सकलदर्शनाधिष्ठात्री सर्वदेवतामयी सर्वमंत्रैः — — — त्रेस्मेत्याह। सर्वचैति सर्वास्विनूा सर्वमंत्रसर्वचक्रे पुरुषनेकान्यनिमत्ता विषयाकोटयः अष्टान्कर्षाक्रमः कोदाइति
कोशः॥ नाभिः प्रकटिता आविःकृता गणनातं स्थायाभिस्ताः अगणिमाः संख्यातीताः इत्यर्थः। तदुक्तं गूढार्थदीपिकायां सर्वपीठनिवासिन्यः सर्वगांचिन्मरीचयः॥
स्यास्ताबाह्यपराकारास्तं तु कुलमातर इति। महातंत्रेपि। चतुःषष्टिमंतः कोटयो योगिनीनां महोजसां चक्रे मेतत्समाश्रितास्संस्थिता वीरसं विदे इति। योगिनी योगःशि
वतामरस्यलक्षः सर्वधोस्त्रास्ताः। कासांचिन्नाशानु। कासांचिन्नरंपरमेति। तदुक्तं सत्कविभिः। संभूमां भोधिमनभ्येति महानद्यानगापगेति। ताः स्पृशन्त्याः स्पृशा

श्री
ए

१८ श्री पस्य

नाम्नास्पष्टार्थस्फुरत्तानविमृशन्ति:तत्तद्वर्णैकरूपंचवाच्यशिवसामरस्यरूपैवेयमखिलतन्त्रमन्त्रवर्गरूपवैखरीवाच्याविद्धशक्तिस्तत्तन्मन्त्रदेवता:योगिनीआप्यस्थि
नेत्यर्थः।तवतेजःनिष्कलत्रगुणप्रकाशरूपंवाव्यंतदन्तनिष्ठानितरांव्याप्तारूपैवेनयोगेनेत्यर्थः॥पद्धानिष्टेतिपदेननिष्कलत्वरोवाभिप्रेतास्यात्॥तदुक्तंलिंगपुरा
णे।यस्यैपरार्थस्यपापाशक्तिःहरीरिता॥सासासर्वेश्वरीदेवीसमदेवोमहेश्वरइति।श्रूवास्तवेति।त्वंचंडिकाशशिनि[illegible]भैरवौहविल्वंत्वंचेतनासिपुरुषेपवनेचल
त्वं।त्वंस्वादुतासिसलिलेशिविनितवमुष्पानिःशासेतरखिलंत्वहतेजगत्स्यादिति।जगतोवसन्तिस्थितिलयविभागवतामादिष्वमध्यःश्वांतश्वतेवतेकालाष्टर
कत्वेननिरुकयत्नेपिस्वष्वाघविद्याविभागोपाधिनाविभागवतूपत्नीयमानानित्यर्थः।रवयति।कृत्वर्थरत्वेलिंजिंतमल्लर।करोतीत्यर्थः।योढापंचधाप्रकारभेदवती
यापरासेवश्रुतिभिरुक्तारीमासंस्तुतामहाश्रीचक्रनगरसाम्राज्ञीसर्वानंदमयमहाबैंदवचक्रस्थापरब्रह्मस्वरूपिणीपरामृतशक्तिः सर्वमंत्रेश्वरीसर्वयंत्रेश्वरीसर्व
पीठेश्वरीसर्वशासनेश्वरीसर्वयोगेश्वरीसर्वयोगिनीश्वरीश्रीमल्ललितांबिकाखिलविद्याराजराजेश्वरीमहात्रिपुरसुंदरीपदवाच्याप्रकाशस्फुरणालक्षणाविमर्शशक्ति
रेवसृष्ट्यादिहेतुत्वंतुशम्भोनोनिर्विभागेत्वपिपरापरत्वेनपरत्वादिभ्रमोपिशक्त्युल्लासावस्थोपरागादितितात्पर्यं॥तदुक्तंकामकलाविलासे।सकलभुवनोदयस्थितिलय
लीलालोकनोद्यतोयुक्तः।अंतर्लीनविमर्शःपातुमहेशःप्रकाशमात्रतनुः॥साजयतिशक्तिराद्यानिजसुखमयनित्यनिरुपमाकारा।भातिचराचरबीजंशिवरूपविमर्शनिर्मला
दर्शइति।शेषोविशेषोमल्कृतसंवगीतव्याख्यायांमहारत्नविमर्शव्याख्यायांद्रष्टव्यः।अथपश्चसंगात्परामन्त्राः।आथर्वणोपनिषत्सुसौभाग्यकांडे।तस्मात्कामोजायतेत्रकच
टतपयशान्सृजतेतत्परिभाषयाकामकलारव्याप्नोतितत्रदितिककारोगृह्यते।तस्मात्तत्पदार्थइत्येवंयोवेदेत्याभ्यसवैसर्वंभित्वापरंब्रह्मप्राप्नोतियएवंवेदेत्याद्यावि
द्यानामभिधायैतस्याःशक्तिकूटालोकामुद्रेत्यादिनराम्नायार्थेलेवमनुनाविडुनाहीनेत्यादिनाक्रोधमुने:।एवंवपूर्वस्यारवेत्यादिना।नवचंद्रकोवेरास्व पः।एवं

स राम १८

५८

द्वादशाम्नायवतीयं महाविद्योद्धृता॥ ज्ञानार्णवेपि परब्रह्मस्वरूपं यन्नादबिंदुकलात्मकं॥ शिवशक्तिसमायुक्तं यस्मिन्नितवानवेद इत्यारभ्य कामराजविद्यामुद्धृत्य॥ एतस्या एव विद्या
याः स्यादिना द्वादशनाम्ना यानुद्धृत्य द्वादशांते स्थिता देवीपाद्ड्मस्वरूपिणी॥ तृतीयं सर्वविद्यानां सर्वाम्नायेस्तु संस्तुता॥ सर्वागमरहस्यं चैवं हि तत्परमेश्वरीति प्रस्तुत्य मह
ता प्रबंधेन षोडशीमंत्रनिरूपणपूर्वमुद्धृत्य वक्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि॥ वर्णितुं नैव शक्येयं श्रीविद्याषोडशाक्षरी॥ वैखरी वाग्भावत्वादशक्या गुणवर्णने॥
मूकीभूता हि पश्यंती मध्यमा मध्यमा भवेदित्यादि॥ यतो निरस्तरवस्तुपरा तत्वानुकारणं॥ आचार्यैर्विवीतरणत्वात् स्वातंत्र्येणानंदलहर्यां॥ शिवः शक्तिः कामः क्षितिर
रविः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरयः॥ अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता भजंते वर्णास्ते तव जननि नामावयवतां॥ स्मरं योनिं लक्ष्मीं त्रितयमि
दमादौ तव मनो निधायैके नित्ये निरवधिमहाभोगरसिकाः॥ जपंति त्वां चिंतामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ जुह्वंतः सुरभिघृतधाराहुतिशतैरिति लोपामुद्राम्नायो
द्धृतिपुरःसरं कामराजविद्यामुद्धृत्याम्नायांतराणि सूचितानि॥ एवं चास्य पराम्नायभेदस्य सर्वाम्नायमयत्वात् षोढा पंचधा च विभवः॥ अयं च स्वतंत्रः कल्पः॥ अथ पंचधा
भूतिरन्याय यया परा त्रिंशतिकामं॥ चतुर्दशयुतं भद्रे तिथीशांतसमन्वितं॥ तृतीयं ब्रह्मसूत्रश्रोणि हृदयं भैरवात्मनेति॥ इयं च परापराणि फलपरानुत्तरपरा चेति॥ बिंदुमध्ये
श्रीचक्रस्य च त्रिकोणं पंचारं च अष्टारं चतुर्दलं पंचारस्वचतुरस्रात्मकं मंडलं षट्त्रिंशत्तत्वात्मकं विधा बैलांतचार्वायतु॥ अथ षोढा विभूतिस्तथा च कुलार्णवे॥ अनंतचंद्रभुवनवि
द्रनंदिषुगान्वितः॥ श्रीप्रसादपरामंत्रो भुक्तिमुक्तिफलप्रदः॥ पराप्रासादमंत्रस्तु सादिरुक्तः कुलेश्वरि॥ इमामपि श्रीचक्रगतबिंदाचेव पूर्वोक्तसर्वमंगलाभिसुकरीस्या
विभावितषट्कोणमूलदेशयतो विलोमनविभाविते षु तत्त्वद्रश्मिसंख्याकदलांबुजेषु पद्मसुषष्ठौ वृत्तित्रयनेदितिगेरवश्चाम्नायः॥ अत्र पंचविकाक्रमेनैवाम्नायामि
ष्ठांतबिंदो हृद्धाम्नामेवारणादिविद्यामिष्ट्वा बिंदुचक्रस्य च प्रथममष्टदलं तद्बहिः षट्त्रिंशतिदलं तद्बहिः षोडशदलं तद्बहिश्चतुर्दलं तद्बहिरेकपंचाशद्दलमिति

ध

३०

षडंगुजात्मकं पीठं विन्यस्य संहारक्रमेण अपंचादिमूहबद्धं विभावयेदिति। श्रीविद्यानंदस्वामिनः ऊर्ध्वाम्नायस्य पराहृपत्वात्संहारपोढ्ढूषोढान्यसोपरि अभवमेव वेत्यभि
युक्ताः। स्यामूलदेवी मूर्त्ती वेदव समाण स्वतंत्रपराण्यमथवेव संवाज्ञ्यामातृका स्याने षुपपंचादिमूर्त्ती विंसुवनाधिपपंचकन्यासक्रमेणायजयेदिति श्रीनन्दानंदस्वामिनः
विदांवेवाचनं न पथ्या कथं विदभिप्रेतमिति चेत् उच्यते पंथां तत्र बीजपुटितं तत्तु सुक्तविद्यायाः सर्वसंपदः प्रामिप्रेतं। अत्र गौरवभियानोद्धृता तत्र बीजमंत्राः समन्तकृतल
लिता चांसंग्रहतो वधेयाः। ननु पराप्रासादजनमंत्रस्य तत्रैव पंचकृद्यो आसे लिखेत् त्रिकोणं षट्कोणमष्टारं च महीपुरं। मूलमंत्रं लिखेन्मध्ये साध्यनामसमन्वितं।
षट्कोणे तु षडंगानि विलिखेत्परमेश्वरि। केसरेषु स्वरानष्टौ वर्गानष्टचैषु पार्वति। भूगृहेषु चतुःकोणेष्वालिखेन्मंत्रमंबिके। एवं वाम्नायागमपि पराविद्यानां स्वातंत्र्ये
ण श्रवणात्तस्याः सांख्यस्य पीठपूर्यागार्चनं। आगुरुक्तादशाम्नायवत्सोस्तु श्रीचक्रराजस्यैवेति चेत्। सत्यं चतुर्थेमि त्रिपुरसुंदर्या प्रातहन्यादोत्र। आसनविधिप्रभृति नाम
क्रमेण तदुत्तरतोपि रश्मिप्रकारा मातृकाभूतलिप्य मठपंचब्रह्मसधारशक्त्यादिपीठमंत्रोतंना मतःएवादिश्य अंतःषोढां कुले यानि कुर्यात्पूर्वोक्तवन्मने। न्यासाषोढा तदुक्तस
कर्मणोत्र कापि नोद्धारः। अस्तु कस्तु महाषोढाह्वयं न्यासं ततः कुर्यात्समाहितः इति तस्य विस्तरेणोक्तिस्तु ज्ञानार्णवगुप्तार्णवादिग्रन्था उक्तं तत्र सापदैवातिष्ठामण
द साधनविधौ कुलागमोदितमित्यादिनेदृष्टः सापेक्षतापीत्यवधेयं। अन्यच्च न डत्तरमपि न्यासाध्या दृतिहरूपमेव विविच्य आगत क्रमार्थसाधनप्रसंगेन समयाचाराणि
रूप्यवाहनावकाशे साकुत्रावाधे सपेक्षायां शाङ्किः इति यंत्रमंत्रमयंत्रोक्तमित्यादिवासनैव द्वारं प्रस्तुतग्रंथे समस्योल्लासेगु रुनामादिवासनास्तु श्रीकैवल्यप्रदा
नाद्येव चतुर्वर्गैककारणात्। केतु वदेव तु शिवाह्यी चक्रमिति कथ्यत इति। श्रीचक्रवासनायाश्च विवक्षितत्वात्। तदनु श्रीपार्श्व श्रीचक्रमित्येव पूर्वग्रंथानुक्रमापेत
दर्पणं निर्णीयते। राजनविधावपि समस्तचक्रचक्रे श्रीसुनेदेविनवात्मके इति मतिषोढासंकेते आगुग्रंथस्तु वितंतनवधात्वन्येव्यक्तीकृता आमप्रच्छिन्नादावपि श्रीच

रम.
२०

प्रभेदकत्रापियंत्रशब्दोनोद्भावितः एवं सति स्थूलदर्शनेसूक्ष्मदर्शिनात्वमाकाम्यकर्म...॥

ना२ पि१

ककारस्येतरत्रापि एवं वरीस्तापुरश्चरणांतरेष्वोः प्रत्येकाम्यप्रयोगाचारं निषिध्यन्तिः कामतपैवकर्णिचित्सयोगानिर्दिष्टास्तेषुतादृशमौर्विदंवासनंयंत्रस्याभिषेकायशिष्यस्य
ताहोवंध्यादीनांचतत्रस्थापितकल...शनलैरीतितरथ्येनेहिपूजार्थबेनपूजार्थतिपंत्रोशनानुकूलविभागेनरेवैश्वपिविधक्कावस्तत्याचनेतिसम्पकूवधारितमित्युलं अ२
पत्त्वेननिरीहेतित्यपाठ।निरिच्छापास्तधाद्योगात्।तथाचश्रुतिः।सितस्वगेलोकान्नुसितस्वेति।हृदयामलेपिहेतुः संकल्पजालसमनोधिष्ठापिनीशुभात्स्वेच्छे ३०
तिपरमाशक्तिरुन्मिमीलततःपरमिति।वसतिचात्रमुनिः।स्वेच्छाशक्त्यानिहृदहृदिमनिजमरः प्रोद्दिमांदोकमानइतिपराविरूपणस्यानुपदमेवेच्छाशक्तेर्निरूप
णीयत्वाच्च।एवंचपराशक्तेरेववैखरीपर्यंतंआहतन्वेनविश्वमयत्वात्सर्वमंत्रमयत्वंसर्वपीठमयत्वंसर्वक्षेत्रमयत्वंसर्वदेवमयत्वंकारकक्रियाकलापमयत्वं।अ
चहेतुलंकारः।नडक्षेहेतुहेतुमतोरैक्यंहेतुंकेचितूवस्तनइति।तत्रेणोनिर्गूढेतिसमद्विमदस्तुवर्णनमुदात्तमपि।तत्रापैवसुंदरीनाम्नेतिगम्यात्प्रस्तुतप्रशंसापि॥
ननुसुंदरीमहिम्नस्तुतौश्रीचक्रश्रुतिमूलकोशइतितेसंसारचक्रात्मकविश्वात्ततदधिष्ठितात्तरमयंज्योतिर्मयंसर्वतः एतन्मंत्रमयात्मिकाविरहणश्रीसुंदरीमिष्टेन
मध्येवैंदवसैंधवपीठमलिनेत्वमृत्विपाशिवेरतिकोधमुनिमणीतरीमापंचधाषोढावस्थापूजाश्रीचक्रराजेवैखरीपर्यंतवाण्यमयत्वेनसर्वमंत्रमपिसर्वदेवमयीश्रीप सिंधुपीठल
रारूपात्रिपुरसुंदर्येवानुभाविताचतुर्वर्गचिंतामणिरितिपर्यवसितंतनस्तुभावनंतुल्यवद्विषयमितिपुनस्तत्रैवावलंबतेवैतालइतिन्यायेनकृतेपिकरुणापीयु
षपाथोधिनापरशिवेनयथाधिकारंतंत्रावतारेपूर्वोक्ताधिकरणन्यायेनरूपणानांमुमुक्षूणांमुक्तिपथ्यदुर्दैवप्रस्तरपातइतिचेन्न।सर्ववैखरीसवीनुग्रहरू
पासर्वमंत्ररूपिणीतत्तदाम्नायाधिदैवतरूपिणीतत्तन्मंत्रकल्पेऽभ्यर्च्यतइतिस्वक्रमेष्टदेवतांकालतत्वशक्तिंपंचधासंकेतरणालिनींपराणेवकालसंकर्षिणींनि
रूपयत्र्यस्यापयतिमाशक्तिःपंचवाहप्रवहनलहरीयक्तैनेजात्मतेजःसंवर्त्ताग्निप्रपीतत्रिभुवनजलधिःकालसंकर्षिणीति।दिक्कालातीतमूर्त्तेर्यापराशिवमहती

६०

३१

भक्तिभाजानविघ्नाद्दत्तिं विज्ञानदानान्यहरति विरुपांतमहत्वं तमेवादिक्कालातीतमूर्त्तेरिति। दिक्कालावनीतामूर्त्तिर्यस्याः दिशः प्राच्यवाच्यादिव्यवहारेण कालस्यापि श
त्र्याद्यवस्थाजनितो परिणामस्तं संभवात् शिवेति। तथाचापूर्वनिरूपितस्थ्यादिहेतुशक्तिस्तोभेऽपि निस्तरंगेऽपि यावत्। चिन्मयस्याप्रमेयस्य निर्गुणस्याशरीरिणः। साधकानां
हितार्थाय ब्रह्मणो रूपकल्पने। न चाम्नायोक्तरीत्या दिक्कालाद्यतीतत्वनिर्देशस्यैव कल्पितो मूर्त्तिशब्दप्रयोगो न वास्तव इति भावः। अत्र श्रुतिः। येनेदं भूतं भुवनं भविष्यत्परि
गृहीतममृतेन सर्वमिति। पादोऽस्येहाभवत्पुनरिति। वाणाद्यकालकलाभावमित्याद्यभियुक्तानित्व वोवानान्त्वेवं रूप्याः दिक्कलोलवतो निर्देशो गवास्थितिरुद्धिभावनेति
वेद्यानां संभवमनंतशक्तित्वादित्याह। पंचेत्यादिना। पंचवचते वा हा अप्पंचेति क्रमक्रीडनमध्यात्मिं चेरूपणादि प्रसमये सिद्धः। तथाचात्मा मनसा संयुज्यते मन इंद्रियेणेत्यादितं
श्रोत्रेरीत्या भूतपंचकं शब्दादिपंचकं इंद्रियपंचकं अवस्थापंचकं प्राणपंचकमित्यादिपंचकत्यक्रीडनस्य कलत्तो धुंवहंति वहास्त एव वाहाः। पंचपेताः ब्रह्माद
यः। तदुक्तं विहगनचंद्रिकायां। पंचविपंचवल्। विभेदिनी वितिः पंचनादलिपिमूर्त्तिभाविता। येपमंचपरधाम्निते वितिर्येनि पंचकमयी निरोहति। पूर्णतत्त्वरत्नताडिंस्या
नुतोऽमिष्यं तं समखिललोकपावनी। पंचधा वहतिशाखगोदया सिद्धसिंधुरिह सिद्धसेविता। शिबिकावहयवाय्यपंचकमिति। तत्स्थिराश्रयतिपंचवाहहेति। पंच
हत्तित्तनुस्वं निगरीति। हत्तितो वनवह्निपंचकं च भूतगुणहविर्ल्लसनइति। ब्रह्मणः प्रभृतिशक्तिपंचके भारतीप्रभृतिशक्तिपंचकं। उन्मनि स्मरति मस्तके वा हृति
सिद्धवल्लनिजयस्य सोजनं। वह्निपंचकलवह्निविग्रहं सभाविच्छिरवमशेषविग्रहं। मूर्त्तिचक्रमधिरूढदिक्कुचोरात्वंपरा विशासिवाचमद्वयीत्यादिना। ते चोपष
वणानि स्वस्वकृत्येषु प्रकृष्टाः प्रहर्त्तमिस्तास्येवलहमीरस्ता मिथ्यन्तं स्फुटं निजमेव वैनं। प्रस्तादित्यादरण। स्वौविकमित्यर्थः। आत्मनस्तेजस्तदेव संवर्त्ताग्निः
कल्पांतानलः संवर्त्तः प्रलयः कल्प इति कोशः। तेन पीतः शोषितः। अव यवं भुवनं त्रिभुवनं। द्विगावपि पात्रादिषु पाठेन स्त्रीत्वप्रसंगो न। अस्तितथाप्य

राम
३१

६१

नेकप्रकारकल्पनस्थापनार्थं लोकत्रयं तद्रूपो नलधिपयाः तदुक्तं विग्रहगन बिंदुकायां। शांततां भजदना मितं पदं शक्तिमानजगदेकसहायतः। निर्मलज्वलनशैववज्जगत्र
व्यवित्विविनिमिक्तितं वपेति॥ तथोक्तं याने कालसंकर्षिणी शक्तिः तदुक्तं तत्रैव॥ बिंदसवित्तपरापरस्थला रुद्रशक्तिरपि कालकर्षिणी॥ त्वत्स्वरूपं पंचविधिवृत्तिस्त
विनी घोषवाडवशिखा त्वडनरमिति। कालुस्य भूतादिभेदैः शनीयमानस्य संकर्षिणी तिरोभाविकेऽपर्थः॥ अत्रेदमवधेयं। कालतत्त्वशक्तिर्नियतिः॥ तदुक्तौ कल
यति नगरेष्पकालो नद्दति॥ नियतमनुनियमयत्येषोऽन्नियतिरितिचा साव द्विधा। महाकाली कालरात्रिश्च। तदुक्तं योगवासिष्ठे। कालतत्त्वमुपक्रम्य। अस्यैवाचरतो
रीनै मुग्धैर्भूतमृगव्रजैः॥ क्रीडापुष्करिणी रम्या कल्पकालमहार्णवः। इत्यादि निरूप्य। चंडीचतुरसंचारामध्येमातृगणान्विता॥ संहारवनविन्यस्ता व्याघ्री भूतौघघातिनी॥
पृथ्वीकरतले पृथ्वीपानपात्रीरसान्विता। कमलोत्पलकह्लारलोलजालकमालिनी॥ विरावा विनानास्फोटैर्नृसिंहोनुजपंजरे॥ सटाविततपीतांसकांतैः कोऽपि
कुंतकः॥ अलावुवीणामधुरः शरघोषामलच्छविः॥ देवः किल महाकालो लीलाकोकिलबालकः॥ अजस्रस्फुर्जिताकारो वीनदः खशरावलिः॥ अभावनामा कोऽप्युः
परिस्फुरति सर्वतः॥ कालरात्रिः स्वयंभूत्वा नृत्यति स्वे निजे क्षया। तस्या भूषणमंगेषु देवलोकनरावली॥ नरकालीवमंजीरमालाकलकलोज्वला। श्रोताडुः कृत
त्रेणपातालचरणोत्थिता॥ एकस्मिन् श्रवणे दीर्घो हिमवानस्थिमुद्रिका। अपरेऽपि महामेरुः कांता कांचनकर्णिका॥ अत्रैव कुंडले लोले चंद्राकौं गंडमंडले। लो
कालोकाचलश्रेणी सर्वतः कटिमेखला॥ पश्चात्सर्वं विविभ्रांत कौमारनृत्य वर्हिणा। नेत्रत्रय हद्दंध्रभूरिभांकारभीषणैः॥ लंबलोलजगद्वृद्धिकीर्णहारपद्धतिः॥
ठवाख्याहतसंहारगौरीकबंधवामरैः। उत्तांडवावलाका [illegible] रभैरवोदरतुंबकैः॥ रणत्सशानरंध्रार्धैर्देहभिन्नाकपालकैः॥ गुच्छैः शरीरखट्वांग संघैरारतिनो वरो भ्र
मयं स्तात्मना स्नानं सर्वसं · हारकारिणी। विश्वरूप शिरश्चक्रवाहकमालया। तांडवेषु विवलांती महाकल्पेषु राजत इति। तथा च। पिनाकी सा

२२

६४

दृगात्तविद्दृगुते स विद्दृतत्त्वमस्येतद्धार्थ्यं तत्त्वपुरुषभावं परतनोः॥ तदा कश्चिद्बोधो भवति विपरीतो मनसि मे महाकालः काली किमुत कलनं वेति
विषयपदनिर्दिष्टेन कुसुमांजलिश्लोके मद्रूक्रीत्वा महाकालो महाकालीति मिथुनं। पुनः अन्यगूहत्वात्परामर्शे कलनमात्रस्यैव भानत्वात्कालरात्रिः साव
महाकालीपीठस्ववरिवस्या। तदुक्तं मंत्रमहोदधौ। कांपजेत्कालिकापीठे दिग्योगिनीमते। या कालकलिता काली कालरात्रीं कथ्यते इति। तथा च का
लस्य त्रिविधस्याविर्यत्र भानेन नालीति कलनमात्रपर्यवसितं विरतावस्थ्याकाचिदित्यर्थः। इयं च निरस्तकालकलना षोडशी कलैवात्माखिलविद्यानां
परतत्वे समन्वयात्। तदुक्तं चिद्गगनचंद्रिकायामेव। भूतभाविभवधर्मतः परं कालयुग्मसमुपास्यते वपुः। कालकर्षिणि वहन्ति योगिनः कृत्स्नतः प्रभवति विश्व
रूपतामिति। ततो नाद्यकालकलाधानमित्याद्युक्ताभिप्रक्रीत्या सामान्यतः कालशबलम्यं कलनमप्यद्वैतबोधेन सम्यक्कर्षणीत्यतः कालसंकर्षणीत्येषा शक्तिः
परादीनां तु प्रकाशविमर्शसामरस्यरूपत्वमित्यबोधाय। अंबिकावामाज्येष्ठारौद्रः प्रकाशांशाः। शांतेच्छाज्ञानक्रियाविमर्शांशा इति हि सिद्धांतः। तेष्वंबिका
शक्तिरेवेयमित्यनुपदमेवाभिव्यक्ततः स्फुटीभविष्यति। न च तथापि परात्वात्त्यतिरिक्त्वं तेषां पंचधा बोधसंदेहे तत्त्वस्यावस्थाः शांतांबिकासामरस्यत्वेन निरूपितत्वात्। को
पीतकिंशुकावत्सुपक्वमेधिया वमानसी प्रतिरूपा च वास्तु भीष्माराध्या व पतौ वैरंजनीति। इमे श्वांबिकाशांते तत्सामरस्यत्वं च परायाः। प्रकृते किमित्यत्राह
भक्तीत्यादिना॥ भक्तिः आत्माधारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्युक्तलक्षणानंतरपंचधा। तदुक्तं कूर्मपुराणे। तस्मादात्मा त्वरं भ्रष्टो ह्योनित्यः सर्वगो
व्ययः। उपासितव्यो मंतव्यः श्रोतव्यश्च मुमुक्षुभिरित्यादि। नास्ति चार्थद्रष्टव्यस्त्वं जगद्गुरुरित्यादिना। तद्वानामतस्यैव विदुषां पाशपाशविनाहं भावभावनापादवाधि
गतपंचधा शक्तिस्फुरितविश्ववाजनोपरागाणां संबाधिनीं महतीं। अविद्यापामहत्त्वं तु स्वानत्याय्यपापीष्ठास्य तिरोधापनरूपं। महतो महीयानिति स्मादिस्मृति

त्यातादृशमहतोपिपरमवस्तुनआवरणाद्या। अविद्यादेहाध्यासादिलक्षणा अप्रशस्ता विद्येत्यर्थः॥ वसनेवायमर्थो विद्याविद्योभयीत्वमेत्यत्रातथाचयोगवासिष्ठे। अ-
विद्यासंसृतिर्बंधोमायामोहोमहत्तमः। कल्पितानीतिनामानि अविद्यायाइति। नयाहेतुभूतयाष्टंनिर्वध्नाति। वीअज्ञानभूः सप्तपदाज्ञभूः सप्तपदैवहीति योगवासिष्ठोक्तरीत्या
अविद्यामाहात्म्यगृहादिवासनात्मिका। ज्ञानभिद्यामेवैकत्वा हत्री रित्यर्थः। तदुक्तं विज्ञानचंद्रिकायां। यावत्सुदृश्यसंशांततासमनी स्फुरतिभावनजिता। तावदृश्य-
विनिश्च भिन्नतासर्वकालिकविनिश्चभासितेति। विज्ञानदानात्। मोक्षैषीज्ञानमन्मृत्तु विज्ञानमितिकोशेतु विगतंज्ञानमित्यर्थः। इहतु सामान्यतो घटादिविषयज्ञा-
नेपिज्ञातोयमित्यनुभवाद्वदिलक्षणमथवाविशिष्टंज्ञानंतत्वज्ञानंतस्यदानात्। तदुक्तंकूर्मपुराणे। अवाच्यमेतद्विज्ञानंममगुह्यंसनातनं। यन्नदेवाविजानंतियतंतो-
पिद्विजातयः। इदंज्ञानंसमाश्रित्यब्रह्मीभूताद्विजोत्तमाः। नसंसारंप्रपद्यंतेपूर्वेपिब्रह्मवादिनः। गुह्याद्गुह्यतमंसाक्षाद्गोपनीयंप्रयत्नतः। वक्ष्येभक्तिमतामद्यशुष्माकंब्र-
ह्मवादिनःम्यादि। अज्ञानमितरत्सर्वंविज्ञानमितिमेमतिरित्यंतं। शिवयोक्तंपाशुपतयोगविज्ञानंपारिभाषिकमित्यर्थः। विश्वस्यपंचवाहमयताभासनेनसाधकस्य

ने५

स्वोत्मप्रतिपत्तिलक्षणंविज्ञानंविज्ञानंतत्प्रतिपादनेनेत्यर्थः। शहरातिनाशयति। तदुक्तंविज्ञानचंद्रिकायां। आद्यमेवभवतोनिसर्गजंयन्मरोप्रभृतिभातिभेदनं॥ त्वं-
त्वमाद्यपरिपंथिनीस्मृतापापविभातिसहृदयधर्ममुज्वलेइति। इतियतन्नदविद्यावृत्तिप्रहरणलक्षणंमहत्वंदेशकालाद्यपरिच्छेद्यत्वलक्षणंत्वमेवासि। नेहनानास्ति

वाहस०

किंचनेतिश्रुतिरीत्याद्वितीयात्वादित्यर्थः॥ वांतस्याः महत्वंनिरुक्तंपंचवाहप्रवहणहेतुत्वमाध्यामिनलक्षणंपत्नत्वमेवा। स्तान्। न्विर्ममहयग्रीवसंहितायांमा-
न्यापकमेतुर्मीवाचमहोत्स्यां वा अथाहतातथैवचेत्यादिना न्यायविद्यास्वरूपमुक्ता। विराववपि। बगलांकालरात्रीं तत्थाकंडीनवाञ्चरीं। कालसंकर्षिणीं चैव
वविंशावेवसमर्चयेदित्युक्तं। एवंवान्याअपिविद्यानिर्दिष्टाभवंति। वक्ष्यमाणत्रिकोणेत्यत्रिवासनायांतासामंतरंगतेतिव्यक्तीभविष्यति॥ यथात्रैवाश्री-

३३

विद्यापाश्चपि विंदुस्याग्राग्न्यास्त्रिकोणवासनायां स्थितिरूपे रेखाहूयनदक्षिणस्रोतः पश्चपातित्वेनाघोरोपास्यत्ववासनया दक्षिणाम्नायेपि स्थितिः॥ ज्ञाना
र्णवेपि॥ खशेमात्मकमालिंगमहाचंडपदं लिखेत्॥ योगेश्वरिपदं पश्चाद्विद्येयं कालिका प्रिये॥ उत्तरान्वयविद्येयं नाम्ना कालीति विश्रुते ति॥ दक्षिणामू
र्तावपि॥ नादनांतकरेमात्ममहाचंडं समुल्लिखेत्॥ योगेश्वरः समाख्याता विद्येयं कालिका मता॥ नवाक्षरीं महेशानि स्मोत्तरनामिकामिति॥ एवं
वास्याः पृथगर्चनं कथं संभवतीति चेत्सत्यं॥ कामेश्वरीमारभ्य ताः महाविद्यानाम्नी चक्रराजे आवृतित्वेन स्थानाम्न्यपि दृश्यते॥ स्वस्वयंत्रेषु पृथ
क्पूज्यास्तिं॥ उक्तंच महाविद्यात्मा सामन्त्र चिंतामणौ॥ नित्यसाधकस्तवराजे॥ त्रिपुरा त्रिपुरेशी च सुंदरी पुरवासिनी॥ श्रीमालिनी च सिद्धांबा महा
त्रिपुरसुंदरी॥ प्रकटा घा तथा गुप्ता तथा गुप्ततरापरा॥ संप्रदाया कुला कौला निगर्भा च रहस्यगा॥ परापररहस्या च तथा कामेश्वरी शुभा॥ भगमालिनि नित्य
क्लिन्ना भेरुंडा वह्निवासिनी॥ महाविद्येश्वरी दूतिर्वीरा कुलसुंदरी॥ नित्या नीलपताका च विजया सर्वमंगला॥ ज्वालामालिनी चित्रा च श्री नी सुभगा कु
ला॥ पूर्णा ब्राह्मी तथा कावं कामेशी मोदिनी तथा॥ विमला चारुणा देवी जयिनी कुलभैरवी॥ सर्वेश्वरी तथा कौली वागीशी सर्वकामिनी॥ सिद्धेश्वरी तथा
चोग्रा दुर्गा महिषमर्दिनी॥ स्वभावती शूलिनी च मातंगी सुरसुंदरी॥ महाकाली महोच्छिष्टा चित्ररूपा महोदरी॥ प्राणविद्या तथैका च गौरी कपालमहांकु
शा॥ वामा शिवा तथा ज्येष्ठा स्वरूपा चारुणा मिता॥ त्रिखंडा त्रिशिरा शौरी गौरी विंध्यनिवासिनी॥ क्षोभिणी नादिनी रक्ता ललिता बकरूपिणी॥ सर्वसंकरी तारा भ
भवानी विश्ववासिनी॥ कोटेश्वरी महाविद्याः कथिताः स्तवभैरवेति॥ कुलचूडामणौ विशेषो यथा॥ असंख्या त्रिपुरादेवी असंख्या च कालिका॥ वागेश्वरी त
था संख्या तथा तत्कुलाकुला॥ मातंगीनी तथा पूर्णा विमला चंडनायिका॥ त्रिपुरैकजटा दुर्गा याचान्या कुलसुंदरीति॥ चामुंडा तंत्रे नु घाधान्येनदशैवोक्ताः॥

सम
३३

कालीतारामहाविद्याषोडशीभुवनेश्वरी। भैरवीछिन्नमस्ताचविद्याधूमावतीतथा॥ बगलासिद्धविद्याचमातंगीकमलात्मिका॥ एतादशमहादेवीमहाविद्याःप्र
कीर्तिताइति। आसामन्योन्यसाधनसापेक्षत्वमपिकालीतंत्रे। यथाकालीतथादुर्गायथादुर्गातुवीतथा। यथातारातथानीलायथानीलातथोमुखी। दुर्गायाःका
लिकायाश्चध्यानंसममहोदितं। महावीनक्रमेणैवताराशीघ्रफलप्रदा। गंधर्वोत्थक्रमेणैवपंचमीदुर्लभामहा। महानीलक्रमेणैवताराशीघ्रफलप्रदा। गंधर्वोत्थक्रमेणैव
कालिकाफलदायिनी। कालिकोग्रतुवीछिन्नाद्याश्चैवविभाविता। समस्तमतिभेदायाश्रीविद्याविद्विनाशुचिः। नासांनुसमनाज्ञेयागुप्तसाधनसाधने। ययाविद्याम
हावंगालासामेषांविधिर्मतः। महानीलक्रमेणैवछिन्नमस्ताविधिर्मतइति। शेषोविशेषोदक्षिणाचाकल्पवल्लीतोवाललिनाचासंग्रहतोवबधेयः। अथैतासामुपास
काअपितत्रैवस्तवराजे। मनुश्चंद्रःकुबेरश्चमन्मथस्तदनंतरं। लोपामुद्रामुनिर्नंदीशक्रःस्कंदःशिवस्तथा। क्रोधभट्टारकश्चैवपंचमीपरिकीर्तिता। दुर्वासाव्यासस्तथैव
वसिष्ठश्चपराशरः। ओवैविष्णुर्यमश्चैववह्निरनिलोवरुणस्तथा। वायुर्विष्णुःस्वयंभूश्चभैरवोगणपस्तथा। अनिरुद्धोभरद्वाजोदक्षिणामूर्तिरेवच। वटुकःकुलपश्चैववाराणी
गंगासरस्वती। धात्रीशेषःप्रमत्तश्चतन्मत्तःकुलभैरवः। क्षेत्रपालोहनूमांश्चरोगगरुडएवच। कश्यपःकौस्तुभःकुंभोजमरुनिर्भृगिलस्तथा। बृहस्पतिर्धर्मश्चस्तोदत्तात्रेयोयु
धिष्ठिरः अर्जुनोभीमसेनश्चद्रोणाचार्योऽष्टवाकपिः। दुर्योधनस्तथाकुंतीसीताचरुक्मिणीतथा। सत्यभामाद्रौपदीचउर्वशीचतिलोत्तमा। पुष्पदंतोमहाबुद्धोवा
णःकालश्चमंदरः। कैलासःक्षीरसिंधुश्चउदधिर्हिमवांस्तथा। नारदश्चमहाधीरःकथितास्तत्रसाधकइति। एवंचाद्यत्रयमनंतरसीठस्वानदकंकुलार्णवे। एकपी
ठेपृथक्पूजांविनायंकरोतिमः। अंगांगित्वमपिस्यात्देवतानांपमानुमात्। एकपीठेकुलेशानिसर्वपीठेपृथक्पृथक्। यजेद्रावणोपेतांदेवींतत्तद्विधानतः।
अत्रास्तदेवतानेकासर्वेषांस्त्रान्यदेवतांउभाभ्यांलभतेयाप्यमैत्रींचबलमानंहरति। अत्रांगांगिभावविवेचनप्रतिपत्तिस्तत्रसर्वमत्रततलितावासंग्रहके।

मुरीतोवमतोवसेयो।एवंचखतंत्रखकत्वेऽश्लीवकराजस्यसाधारणकमस्तुपरिवर्पंचयिष्यतेइति शिवं।तथाचवेषुचिन्मंत्रेषुसामान्यतोऽमुकस्यपुत्रम
मुकस्याभार्यालभिषेत्यादीनांमंत्रत्वानांभावार्थ्याचरणेद्वितीयेध्याये त्रनाम्नातेषुमंत्रत्वमाम्नातेषु हि विभागः स्यादित्यधिकरणेऊहस्य वरनामधे
यानांमंत्रत्वममंत्रत्वंचेतिसंशय्यतेषांममंत्रत्वंव्यवस्थाप्यप्रसंगेनयदिहप्रवरादिषत्तेषुमंत्रत्वंप्रत्निमस्योत।खिलस्येति संशय्येत्रत्विमस्येवे
तिनिर्णीयतत्प्रसक्तानुप्रसक्त्येदमपिविचारितं।एषवोराजायस्मुष्पाः पुत्रामिमनुष्येत्यादिमंत्रस्थस्यसर्वनाम्नोमंत्रत्वमुतनेतितत्राम्नातस्य सर्व
नाम्नोराजादिपदप्रयोगेसामान्यरूपपर्कमात्रमूहादिवदमंत्रत्वनिर्णयात्मंत्रत्वमितिचेन्न।स्यादेवंयदिसर्वनाम्नआम्नातस्यग्रामाणप्समर्पकत्वंमं
त्रतुशद्वानरूपपर्कत्वस्याभिधेतत्वमेव।तथाहि।ऊहेश्चममेत्वानुष्टं निर्वपामीतिप्रकृतौमंत्रध्वनिः।विकृतौतुसप्यदेवताकेचसत्याप्यइतिरूपायै
तिपदमूह्यमितिपुम्नतस्यतस्यामंत्रत्वमेवंप्रवराध्येहेनाप्यस्तितदेवलशांडिल्यादिस्यबाभ्यपदकीर्त्तनात्तथैवनामधेयपदेहेनापियजमानादिपदत्वा
ध्याविष्णुशर्मादिकीर्त्तनादनाम्नातावरनामधेयानिकीर्त्तयेदितिवाक्येपिमंत्रप्रमोज्यविशेषद्वयेनाम्नानाभावान्नमंत्रत्वं।सर्वनाम्नांतुराजादिरान
र्वविशेषविषयशद्वानुमंत्रवाक्यनिवेशिनोदर्शयतीमेतदर्थमेवसर्वनामपदंहष्टार्थेनाधीतमप्यापितंनिश्चीयते।तस्माद्राजादिनाम्नामप्याम्ना
तत्वाभावान्मंत्रत्वमेवेतिपूर्वमीमांसायांनिर्णयाद्यस्तेवमंत्रत्वानन्वस्तुमंत्रत्वंतथापिकथंताद्दशार्थवतांमंत्राणांषडुत्वयोपपिवेतेतिकेचित्।अ
वदेहि।वक्ष्यमाणज्ञानकर्मसमुच्चयरीत्याकर्मणांचित्तशुद्धौपयोगिकृतमात्मतएवज्ञानदर्पणेनिर्मलेदेशिकेंद्रसत्तुपदंहितंविम्बमर्पविम्बागो
तंषडुत्वमनालंप्रतिबिंबति।तडुक्तंयोगवाशिष्ठे।स्वज्ञानदर्पणेस्फारेसमस्तावस्तुजातयः।इमास्ताःप्रतिबिंबतिसरसीवतटद्रुमा।इति।तर्द्द

ब्रह्मविद्यायाः स्वतन्त्रविधया स्वक्रमविषयेतरविद्यानां स्वक्रमविधये नित्यवस्था। एवं च राजश्यामामायो[?]क्रादयो व्यहूय्याताः अयेनस्या विद्यायाः क
ल्पसूत्रे मन्त्रान्तरं। बालां प्रयोनिकामं तत्पदेष्टयिवीमापां तृतीयभटं स्वबाप्ये स्हूपेत्याहाह मित्रुत्वा स्मृति[?]नमः नमो नलबिंदुमहासंहारिणि परा खंडश
हृः कालीकट्रसमस्तमुद्रावीजं महाना। क्लेशहीनं तमास्कवि महाचंडपदान। कण कटूरहस्ति स्वित्विनि संहत्याद्यानां ज्ञातिलोम्यां। खेचरी बीजं महाचंडास्तराणि च योगेश्वरी
नि विद्यापंचकं हृपिणी कालसंकर्षिणी परमार्थ रहस्यिनी नि। असौ च सर्वविद्यावन्यासध्यानानंदकमिति भद्रानंदस्वामिनः श्री विद्येतर विद्योपासकैः स्वक्रमविधाया
न्या ह्यास्यि जनोत्तरंगिपमेवपन्वयविधया विमर्शनीयेति तेषामाशयः। षडंगानि त्वनुपदमेववक्ष्यते। अलंकारस्तु पूर्वोद्दिष्टस्वविशेषेण तयाहाभिप्रायत्वेन परिकरः॥ त
थोक्तं। विशेषणैः साभिप्रायत्वं परिकर इति। कालसंकर्षिणीत्यस्य विशेष्यस्य साभिप्रायतया परिकरांकुरः। तदुक्तं चंद्रालोके। साभिप्रायं विशेष्यं चेद्भवेत् परिकरांकुर इति॥
विज्ञानदानरूपपदार्थस्य विद्याट्न्निवहरणहेतुत्वात् काव्यलिंगमपि। तस्मान्महत्वं त्वमेलुद्वावेहे त्वलंकारो वेति संदेहालंकारः॥ ११॥ तदेवं स्वतन्त्रे स्वक्रमविधे निरूप्य परेषां
षडंगशाक्तिभिर्म्यादनेति त्वचनुसाधारणीं षडंगवासनामाह। सर्वज्ञो नित्यतृप्तः सरसउभयगो नादिबोधः स्वतंत्रो नित्यालुप्तात्मशक्तिर्निरूपमचपि तेनांगषट्कं। षडस्य तश्चेदनं
निश्चनं भावत्स्वामिहपरिशिवस्तायसंदेशिको माया पेनत्वात्मनानारतकलसितं तेपरायाः सभेदं हे शिवेति। शिवमुक्तिरूपस्येयस्या। खेल्वमिहात्मिनु शरीरे। अंगादीनां हृदयादीनां ष
डूहृदयशिरः शिखाकवचनेत्रास्त्ररूपेषट्कं। कूर्मपुराणे ईश्वरगीतासु। सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तता च। अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महे
श्वरस्येति। सर्वज्ञनातिसर्वज्ञः। अत एते त्रिरोपश्रुतिः। ईशानः सर्वविद्यानामिति। श्रुत्यंतरं च। यस्सत्तानमर्मंतपरति। अत एव नित्यतृप्तः पूर्णइत्यर्थः॥ तथा च वाजस
नेयीश्रुतिः। तदात्मकाममासकामसकाममरूपमिति। सरसउभयगइति सदमृतमसन्मृत्युः। सदसती उभे गच्छतीति तयोःकाः। तथा च योगवासिष्ठे। मन्नस्सदसतोर्म

३५

ध्येयं स्वबुद्ध्यावलंब्यत इति। कोटिद्वयांतरालस्थमिति वा। अनादिर्बोध इति। अत एवानादिरेकचिन्मो बोधोऽस्यानुभवोऽस्य तथोक्तः। तथा वाजसनेयी श्रुतिः। अदृ
ष्टो द्रष्टा अश्रुतः श्रोता मतो मंता विज्ञातो विज्ञाता नान्योऽस्ति श्रोता नान्योऽस्ति मंता नान्योऽस्ति विज्ञातेति। उक्तं च महाकविभिः। आत्मानमात्मना वेत्सीति। अत एव स्व
तंत्र इति। स्वतंत्रोऽपावृतः स्वैरीति कोशः। स्वच्छंदः स्वपथ्यः(?)। तथा वाजसनेयी श्रुतिः। असंगो ह्ययं पुरुष इति। अस्थूलमनण्वह्रस्वमदीर्घमलोहितमच्छायमतमोऽवाय्वा
नाकाशमसंगमित्यादिरपि। स्वतिष्ठ(?) स्वतंत्रः। पुरुषो ह्यजर इति। निरालंबमात्मशक्तिरिति। निरा(?)विनाशिनी। तदुक्तं श्रीमदाचार्यैः। निधे नित्यस्मेरे निरवधिगुणे नी
तिनिपुणे निराधीनज्ञाने नियतपरिचित्तैकनिलये। नियत्या निर्मुक्ते निखिलनिगमांतस्तुतपदे निरातंके नित्ये निगमयममापि(?) स्तुतिमिमामिति। अत एव सत्यादि
नापप्पदस्याश्वप्रटलाट्टतानामदर्शनरूपलोपसंभवात्। हृद्विरूपाय्य(?) वागतचक्षुषां। पामरादीनामपि प्रतीतिविषयत्वात्सुलभानाकलितादेशकालाकालैरित्यर्थः। तथा
चकोपीतकिं(?) श्रुतिः। प्रतर्दनं दैवोदासीर्दुर्लो(?)क्तः। यो मां विजानीयात्त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीन्सालावृकेभ्यः प्रायच्छं बह्वीः संधा अतिक्रम्य दिवि प्रह्ला
दीयानतृणमंतरिक्षे पौलोमान्पृथिव्यां कालखंजांस्तस्य मे लोम च नामीयते स यो मां वेद न ह वै तस्य केन च न कर्मणा लोको मीयत इति। इति परमैश्वर्यमिति धातोर्हरणादिरिति ह्र
दुःपरमैश्वर्यवान्परमशिव एव। मंत्रांतरमपि। संक्रंदनो निमिषमेकवीरः शतं सेना अजयत्साकमिंद्र इति। प्रतिलब्धं स्वविनैः प्रतीयमानेत्यर्थः। आत्मनः प्रकाशरूप
स्य निरुक्तलक्षणस्य शक्तिः स्फुरणलक्षणा विमर्शाख्या यस्य तथोक्तः। तदुक्तं कूर्मपुराणे। ममैव परमा शक्तिर्या सा लोकविमोहिनी। ममैव परा शक्तिर्या सा विद्ये
तिकीर्त्यते। स्थापयामि तया(?) सायुं(?)योगिनां हृदि संस्थित इति। कामफलाविलासेति। स्वौविकस्वरूपाविमर्शपूर्णस्य विघ्ने पराशक्तिरिति। अपवात्मानः शक्तिरूपः। त
दुक्तं कूर्मपुराणे। अहं हि सर्वशक्तीनां प्रवर्तकनिवर्तकः। आधारभूतः सर्वासां प्रवर्तकनिवर्तकः। एका सर्वांतरा शक्तिः करोति विविधं जगत्। आस्थाय ब्रह्मणो रूप

राम·
३५

६८

नन्वीमद्विशिष्टता। अन्यावशक्तिर्विपुलासंस्थापयतीमं जगत्। भूत्वा नारायणोऽनंतो जगन्नाथो जगन्मयः। ततीयाम हती शक्तिर्निहंति च सकलं जगत्। तामसी मे सना।त्वा
ना कालात्व्याहृद्रूपिणी॥ इति। इर्ष्वाकं पूर्वनिरूपितकालसंकर्षिणीं अप्यभिप्रेक्षं। निरुपमचरितो नंत इति। यएवंविधात्तो निरुपमम् अनुपमानरूपस्यापरस्यालाभाद्रुप
मा।हितं चरितं यस्य स इति तत्र रूपरूपाक्रमावितीनो गणगावस्थितिर्यस्य तथोक्तो नरवानंतो परिछिन्नः। तथा च कठवल्लीश्रुतिः। रूपं रूपं प्रति रूपो बभूव तद
स्य रूपं प्रति चक्षणायेति। बाजसनेयिश्रुतिः। पा इंद्रो मायाभिः पुरुरूप ईयते इति। वाश्वरइदं महद्भूतमनंतमपारं इति बृ इति बृ श्रुक्षिय कभवइतः। इति प्रको
रेणात्सर्थः। सर्वैः सर्वज्ञतानित्यतृप्त्यनादिबोधतास्वतंत्रतालुप्तनानंतताख्याभिः शक्तिभिर्युक्तः। अनंतशक्तिर्विततण्याथोनूक्तमाणिक्यः। व्यंजितरस्सर्थः॥ भावः सन्नाप
स्नतयोक्तः। यथा पूरेण कार्येण कारणभूताया अनुपरिदृष्टया अनुमितिः। तद्वत्कं तत्कविभिः। हृष्टो नदीमुखेनैव पस्यानं लवणं महद् इत्यादि। त्वं देशिको ज्ञेयो तादे
शिकः। दिशाप्रकथ्यते इति धातोस्तुत्सन्नः श्रेष्ठतं कथ्यनंतुनिः प्रपंचं निरीक्षेत तदृष्टा हैतवी रंबुधिः। शुधाई याचिपूर्वस्लु लीपतानां वे छ्नरतिरिमादिविलपा
शपाटनसमर्थनिरीक्षणपूर्वशिष्यास्तनः परशिवाईभावभावनोपदेशरूपं निष्कलत्वं शिवपुधानमूपत्वं गुरोः। पितन्निरीक्षणसामर्थ्याद्यात्मनश्च शिवात्व
तां। भावयेद् क्रिन अतः स नूशंको न्येषाकलंकितइत्यत्र वत्तुः शनैरीत्यादिश्यतिप्रकथयपति। देशिक ससरकृप्युक्तं हृदं मलकेयस्याजनेशां भवत्वं तयोमध्ये
नस्मश्रीपादुकास्मनिरिति गुरुपादुकास्तोत्रं इत्याप्रकरणत्वपरूपसैवपराशिवपुरोः संप्रदायाविच्छित्याद हिन्नेण मूर्तिर्मिश्राणां दर्शनादाषिः। सचोभयो
रपिविधयोः। यथा प्राकृता अपि शरामनुष्पादिकं दोनिमहादहत्यां तथात्रापि मंत्रार्थगोपगोच्छंदः। तथा च कौशुमीश्रुतिः देवा वै मृत्यो बिभ्यतश्छ
दांविद्यां प्राविशंस्ते छंदोभिराच्छादयन्यदेभिश्छंदस्त्वमिति। दसेनेचतुष्पादिवानाश्रुतयोमातृकास्कंधराशिविवेकेन्यासेविर्घा दिनेश्नेम्

३६

अत्र च पंक्तिः ह्रस्मयोः परदेवतात्मिके देवते परा कालसंकर्षिणी तदुक्तं मडक्कलल्लितावर्तसंग्रहे। स्वप्रकाशचिदम्भोधिवैहारलीलारसोज्ज्वलः॥ परार्थमस्तकेभा
सान्तर्दृष्टमेतामन्त्रे बीजेषु॥ सर्वेषां मन्त्रतत्त्वानां छादनाच्छन्द आननेः। अहमित्यमनन्यार्थं तं देवनं देवता हरीति। ततो हृदयांबुजमध्ये पराशिवं चिदात्मकं विचिं
न्तयत्र समनस्कं जीवं नम इति मंत्रेण समर्पयेत्॥ तदुक्तं आगमकल्पद्रुमे। इत्थमानहृदयं यो हृदयेऽस्मा चिदात्मकः॥ किं पतेतत्परत्वेन हृदयेन ततः परमिति।
ततः स्वाहेति मंत्रेण सकलं वेद्यरूपं स्वयं द्विप स्तुवामतो द्वाहृदमानीयतात् [illegible] रूपं वमनुवीयमाने सर्वज्ञादिगुणस्फुटे परसंविदग्नौ जुहुयात्॥ तदुक्तं तत्रैव।
सर्वज्ञादिगुणस्फुटे परसंविदग्नौ जुहुयात्। तदुक्तं तत्रैव। सर्वज्ञादिगुणोत्तुंगे संविद्रूपे परात्मनि॥ किमने विषयाहाराशिरोमंत्रेण देशिकैरिति। ततो वषडि
ति मंत्रेण दीपादीपोत्तरमिषतत्त्वमकूचेतन्यमनुलोमक्रमेण स्वमार्गेण बहिः सर्वत्रैमपरसंविदनुस्फुरतया चिन्मयतया परामृशेत्॥ तदुक्तं तत्रैव। हृ
दि रोहूपच्छिद्यामनयतावासनाद्ध्वा॥ क्रियते निजदेहस्य शिरोमंत्रेण देशिकैरिति। ततो हुमिति मंत्रेण भूतशुध्यादिशुद्धमात्मदेहं मंत्रमूर्त्तिं विमर्शमंत्रवा
श्येन तिजसावंध्यानां रक्षणं। कोऽर्थः शरीरे ये ये उपाधयो हृदके तन्व्यास्त्वान्न हरी कृत्स्नात्म विमर्शेर्ण। भेपदार्थगोपनं कवचार्थ इत्यर्थः॥ तदुक्तं तत्रैव॥ मंत्रात्मक
स्य देहस्य समन्तवश्येन तेजसा। स्वतिो वमिमंत्रेण क्रियते ह्यनुसंहितिरिति। ततो वौषडिति मंत्रवाश्येन तेजसा समस्तात्मनः प्रतिलोमक्रमेणैक्यं विभावयेत्॥ तदु
क्तं तत्रैव। पर्स्यासिपरं स्तानं संचिद्रूपे परात्मनि। हृदयादिपरं तेजः स्मरेत नेत्रसंहितमिति। ततः फडित्यनेनैव विमर्शोत्थेन तेजसा। स्वस्याध्यात्मिकं जीवस्वरू
पं आधिभौतिकं सुखदुःखादि। आधिदैविकं धर्माधर्मरूपं। तापत्रयं नाशयन्नस्त्रं वा स्वं। तदुक्तं तत्रैव। आध्यात्मिकादि यद्रूपं साधकस्य विनाशयेत्॥ अविद्याजात
यत्स्वं यत्सर्वं धामहरमीति। तत्र शिवासनारागमयोगगुरोः हृत्स्व्याहारेण। पथ्यास्वर्वज्ञानकिर्धाम्नो हृदयायमनः॥ नित्यतन्त्रशक्तिधाम्नशिरसे स्वाहा। अनादिबोधश

रा०
३६

69

तेजोधाम्ने अखण्डपूर्णायेति। शिवायैव षडध्वस्वतंत्रशक्तिधाम्ने कवचाय हुं। नित्यमलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट्। अनंतशक्तिधाम्ने अस्त्रायफडिति रूपेण। न्यायलेशमाविषयः क्रि
यते येनेति तद्विति शेषः। तर्हि येन प्रमाणगोचरीकरणेनानारे। नास्ति नादो यस्मिंस्तथोक्ते। नादस्य सूक्ष्मस्थूलत्वविभागे विविदुर्दृष्टिध्वनादेर्नवरनकलाव्याप्तिभिः साधिदैवैरित्या
दिनात्रैव वक्ष्यमाणरीत्या महाशून्ये स्वस्वरूप एव विलयापनात्। तत्त्वं शिवस्य। अत्र प्रमाणं। पिंडं मेवानकविस्तरस्य महतः संस्कारशेषा स्थितिर्नादो सौ नवमहाद्विदिवी। समना सीमान
मुल्लंघयन्नाघंटाक्षणध्वक्रमेण विश्रमन्नेत्यामरणीयलनी। मा जिघ्नुरपरा विदशामनुपमां मूर्च्छिराणीं ममेति। अनादावतीतस्मादिपाठस्तु पूर्वापरविवक्षितपर्यालोचनमूलः।
अनादेरिति पाठे परामाविशेषणं। तस्या स्वचैतन्ये जोंतर्निगूढाद्वयपतिं गगनोमादि मध्यांतकालानित्यत्वानादित्वस्य व्यवस्थापितत्वात्। एवं लक्षणेन वसंबंधितिस्वात्मनिस्वतते
पंचपापापाषेठापंचधेत्याद्युक्तेनिर्वचनायाः। श्रीमच्छ्रीचक्रनगरसाम्राज्याः श्रीमत्त्रिपुरसौंदर्याः सभेदमिति। भेदैः पश्यंती मध्यमा वैखरीभिः। इच्छाज्ञानक्रियाकुंडलिनीमातृ
काभिः भारतीवसुंधरारुद्राणीभिः। आगुक्तषोढापंचधाविजृंभितेरित्यर्थः। वामादिनादिभिः निरुक्ताभिः षड्विंशशक्तिभिः स्वस्वभेदैः सह पश्यान्तेति क्रियाविशेषणं। केसकल
विलसितमिति। सकलंकलाभिरष्टत्रिंशद्भिः शिवस्य मंडलत्रयस्य च प्रणवकलाभिश्चैकपंचाशद्भिर्मातृकाः स्कंधविवेचने विवक्षितोभिः सह विलसितं। पुरत्रयसंवर
णं विहरणोल्लसितं। तदुक्तं पूर्वं चतुःशत्यां। अविश्वपरमानंतु सत्त्वमाकारस्वरूपिणी। कवलीकृतनिःशेषबीजांकुरतांगता। वामाशिवा तथा ज्येष्ठा शृंगाटाकारतां गता। रौ
द्री तु परमेशानि जगद्ग्रासस्वरूपिणी। एवं सा परमा शक्तिरेकैव परमेश्वरी। त्रिपुरा त्रिविधा देवी ब्रह्मविष्ण्वीशरूपिणी। ज्ञानशक्तिः क्रियाशक्तिरिच्छाशक्त्यात्मिका प्रिये। त्रैलो
क्यं संसृजते यस्मात् त्रिपुरा परिकीर्तितेति। तास्तु धामेति विशेषः। एतादृशपरमबोधवान् देशिकानुग्रहतः स्वस्वरूपेवतथा पश्यतीति भावतः। अलंकारस्त्वत्र पर्यायोक्त पूर्वपूर्व
स्योत्तरोत्तरहेतुत्वात् कारणमाला। तथा च सूत्रं। तत्र पूर्वं पूर्वस्योत्तरोत्तरहेतुत्वे कारणमालेति। देशिकौत्सुक्यात् षट्स्वेकभाव इति पदार्थं व्याप्तिमिस्तु पक्षमध्यगाम स्त्रीपुष्टस्यत्रात

३७

गायत्रीमध्यंदिने सावित्री सायं सरस्वतीति हेतुकगर्भस्य ज्ञानांतवाक्यस्योत्तरवाक्यं प्रति हेतुत्वाद्वाक्यार्थहेतुतर्कका अलिंगमपि। १९ ननु सौभाग्यकांडे अथर्वश्रुतौ गायत्री सा
वित्री सरस्वती सजपामात्रकात्मा सर्वमिदं व्याप्य तिष्ठति पंचरूपा गायत्री मुहूर्त्तप्रातःसंध्यायां गायत्री मध्यंदिने सावित्री सायं सरस्वती निरंतरमजपा हंसः इत्येवं मातृका पंचाशद्वर्णविग्रहेण
कारादिक्षकारांतेन व्याप्तानुभवना निशाद्याणि छंदांसीत्येवं भगवती सर्वव्यापिनीत्येवं तत्सैन भोगमुक्तितानू भगवानाहेत्यादिना गायत्र्या एवं विश्वात्मकतया तत्तन्नीतिनिष्ठा च निरूपिता।
परामन्त्रोर्ध्वं निरूपिता गायत्रीन सर्वेति गायत्र्या एवोपास्यत्वेनाम्नु। अन्यत्र एकमेवाद्वितीयमित्याद्यैकत्वं। अस्वरा विमर्शरूपो स्वांशादिति द्विधात्वं। मातामानं मेयं बिंदुत्रयभिन्नरूपाणि। धामत्रयपीठ
त्रयशक्तित्रयभाविता अपि चेति देवानां त्रितयं त्रयी ऊतभुग्नमित्यादिना त्रिधात्वं हि वंचयोडापंचधावेति। वासनो दिवेचितानवत्नयरूपा एप मनिचातुरीयाकाग्नित्वमिति तुरीयवासनानु
विवेचिनेति शंकाद्वयं द्वाभ्यां परिहरन्नाह। गायत्रीं शतमखफलदां वेदशास्त्रैकवेद्यां चिच्छक्तिं ब्रह्मविद्यां परमशिववनश्रीपरां व्याकरोति। शब्दब्रह्मैकवाच्यामखिलमतमिति व्यक्तिं न्यात
मवाप्यां समस्तो नो विधूतिं त्रिभुवनमयतां त्वं नत्व सर्वतुष्टः हे परमशिवाठकं निर्वचनं गायत्रीति गायं तंत्रायते सा गायत्री॥ तथा च छांदोग्यश्रुतिः। वाग्वा इदं सर्वं भूतं गायति च त्रायते च वा
वै सा गायत्रीति। तां हैके सावित्रीमनुष्टुभमन्वाहुरिति च। कुतः यतो वेदमात्री वेदानां मात्री प्रमात्रीत्यर्थः। श्रुतेर्गायत्र्याः प्रकृतत्वात्। शतमखफलदेति। अत एव शतानि मखाः श्रुतिप्रति
पाद्यान्योतिष्टोमाद्यास्तेषां फलानि स्वर्गादीनि ददातीति तथोक्ता। वेदशास्त्रैकवेद्येति। तत्र विवक्षितं विधूतिमोगे सत्र्यह्येन। यतो वेदानां शास्त्राणां चैकं वेद्यं यस्यां त्र्यक्षाद्विदि चक्षमासं
तः। परधामप्रतिपादकत्वात्। यातेषां वेद्यानथा च छांदोग्यश्रुता बृहद्ब्राह्मणे। अथ सावित्र्यंगानि व्याख्यास्यामः। शिरो ब्रह्मा ललाटं द्यौश्चक्षुषी आदित्योनत्तु [illegible] मुखमग्निर्जिह्वा सरस्वती
त्वष्टा ग्रीवा वसवः रुद्रा बाहू उरो वायुः हृदयमिंद्रो विष्णुर्नाभिः प्रजापतिर्जघनं मूरू मरुतो वेदाः पादौ स्मितं विद्युद्धसितं वायुरस्याः निपतंतीः समुद्रा वासांसि नक्षत्रा
णि वलयपलंकारो [illegible] अथर्ववेदः ताउ पापकान्मूलाधिकावस्तव स्मात्स्वस्तिदेव ऋषिभ्यश्च ब्रह्म सत्यं च पातु मामिति ब्रह्मसत्यं च पातु मामिति। योगीश्वरः। गायत्री

वेदमात्री

२०

६३

चैववेदांश्चतुलयातोलयत्पुरा॥ एकतश्चतुरोवेदाःसांगादेवीनथैकतः॥ दशकृत्वोऽजपाद्यस्तुगायत्र्यांछन्दसांलघु॥ तत्पापंप्रणुदेत्सद्यःनात्रकार्याविचारणेति॥ याज्ञवल्क्येपि॥ गाय
त्रींयोनजानातिवृथातस्यपरिश्रमः॥ एकतश्चतुरोवेदागायत्रीचैकतःसमेति॥ यमस्मृतावपि॥ नतथावेदजापेनपापंनिर्दहतिद्विजः॥ यथासावित्रीजापेनसर्वपापैःप्रमुच्यते॥
गायत्रीमात्रसारोपिवरंविप्रःसुयन्त्रितः॥ नायन्त्रितःसर्ववेदःसर्वाशीसर्वविक्रयी॥ इतिवेदानांशास्त्राणांचोपक्रमोपसंहारयोर्गायत्र्याएवप्रशंसितत्वादित्यर्थः॥ कू
र्मपुराणेपि॥ सावित्रीसर्वजप्यानामिति॥ पद्मपुराणेपि॥ सावित्रीचापिगायत्रीति॥ विष्णोःक्रीडेति॥ विमृश्यचैतन्यं॥ त्रैलोक्योपलक्षितसंविदितिनिर्घण्टः॥ शक्तिःचिद्रूपसा
मर्थ्यंतथाचेश्वरप्रत्यभिज्ञायां॥ चितिःस्वतन्त्राविश्वसिद्धिहेतुरिति॥ अतएवब्रह्मविद्या॥ ब्रह्मानुभवोपायोऽथवाब्रह्माकारैवविद्या॥ तदुक्तमथर्वशिरःश्रुतौ सावित्र्यहं॥
गायत्र्यहमिति॥ तवश्रीपरेति॥ श्रीपरानिरुक्तनिर्वचनावाक्॥ तथाचवाजसनेयीश्रुतिः॥ गायत्रीवाइदंसर्वंभूतंयदिदं॥ किंचवाग्वैगायत्रीति॥ शब्दब्रह्मैकवाच्यामिति॥
शब्दब्रह्मणः तथाचाथर्वणश्रुतिः॥ शब्दार्णवेपरंब्रह्मतस्मिन्क्षीणेपरक्षरं॥ तंविद्वानुत्तरंध्यायेद्यदिच्छेच्छान्तिमात्मनः॥ द्वेब्रह्मणीवेदितव्येशब्दब्रह्मेतिविश्रुते॥ श
ब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छतीति॥ तस्यवाच्यमेवब्रह्म एकंवाच्यंअर्थभूतामित्यर्थः॥ अखिलमतमितिव्यक्तत्वामिति॥ अखिलानिमतानिवेदत्वादिदर्श
नानितेषांमितिर्यथार्थानुभवः॥ तदुक्तंमितिःसम्यक्परिच्छित्तिरिति॥ तथाचोक्तंस्फुटंतत्त्वंवरेण्यंभर्गोपियस्याः॥ उक्तंचसुन्दरीमहिम्नः॥ स्तुतौक्रोधमुनिनैव॥ गाय
त्रीसशिरास्तुरीयसहितासंध्यात्रयीत्वागमैराख्यातात्रिपुरात्वमेवमहतांशर्मप्रदाकर्मणां॥ तत्तद्दर्शनदिव्यशक्तिरपिचत्वंब्रह्मकर्मैकवारंकर्त्रीहंपुरुषोहरिश्चभ
वितारुद्रःशिवस्त्वंगुरुरिति॥ अथवाव्यक्तानितत्त्वानिपृथिव्यादिपञ्चभूतानिचतुर्विंशतिः॥ तस्याःप्रत्यक्षरवाच्यानि॥ तदुक्तंशारदातिलके॥ अथोवक्ष्यामिगायत्रीं
तत्त्वरूपामितिचतुर्विंशतितत्त्वानितद्रूपता॥ तान्यक्षरन्यासेवक्ष्यन्ते॥ अनेनगायत्र्यक्षरैःसाङ्गैस्तत्त्वन्यासोपिसूचितः तत्परार्थादर्शनेऽस्याख्यातारः॥ प्रत्यक्षरन्यासे

२८

तत्त्वरूपतेमात्काप्यत्रगौरवभियानप्रपंचितात्ततो विभावनीया ॥ अतएवावाच्यं । तत्त्वरूपतया विश्वरूपत्वाद्वक्तुमशक्यमित्यर्थः ॥ यत्तु ऐवमिद्धं तेषट्त्रिंशत्तत्त्वा
निगायत्री तु चतुर्विंशतिस्ततस्तत्तुरीयविवेचनेव्यक्तीभविष्यति । समस्तेतिविभूतिमिति समस्तेतां हि भूरादीनिविभूतियस्याः उक्तं च तंत्रांतरे ॥ भूः पदाद्याव्या
हृतयोभूरादिः हनिवर्त्तिनि । तत्त्वेस्वसर्वजनगतस्वात्तुव्याहृतिर्जनः ॥ तपोज्ञानंतथा चैवतथातापनया स्मृतं ॥ सत्यंपरत्वाद्ब्रह्मत्वादनंतज्ञानतः स्मृतं । त्र एवस्व्याहृतीनां गाय
त्र्येकामयोच्यते । अकारोभूरुकारस्तु भुवो माणस्वरीरितः । बिंदुर्महस्तथा नादो जनः शक्तिस्तपः स्मृतं । शांतिः सत्यमिति प्रोक्तं मत्रत्रयरतं परं तद्वितीयेकवचनमेनंतावि
लवस्तुनः । सृष्ट्यादिकारणं तेजः परंब्रह्माभिधीयते । यत्तत्सवितुरित्युक्तं षष्ठ्येकवचनात्मकं । धातोरिहविनिष्पन्नं प्राणिनामवबोधकात् । सर्वाशां प्राणिजातीनामि
तिप्रसवितुः रहावरेण्यं वरणीयत्वात्प्रार्थनीयत्वात्सेवनीयतः ॥ पूर्वसाष्टाक्षरस्यैवं व्याहृतिर्भूरितीरिता ॥ पापसंभंजनाद्भर्गो भक्तस्निग्धतयाथवा । देवस्य दीप्यमानस्य षष्ठ्या
द्विगुणितस्तथा । ध्येविंतायामतोधातोर्निष्पन्नं धीमहीत्यतः । हीनतादृष्टितं तेजोयत्स्वात्तस्तुहिरण्मयः । अस्तुतस्यः सोऽहमित्येवं चिंतयामः सदैवहि । द्वितीयाष्टाक्षरस्यैवं व्या
हृतिर्भुवरीरिता । धियो बुद्धिर्मनोरूपं छांदसत्वात्सईरितः । कृतश्चलिंगव्यत्यासः स्वचार्बुद्धिः परग्रहात् । यत्तेजोनिरुपमं सर्वदेवमयात्मकं । नइति प्रोक्तमारेणःस्व
ष्ठात्वद्विनिवास्मदः । तस्मादस्माकमित्यर्थः ॥ प्रार्थनायां प्रचोदयात् । तृतीयाष्टाक्षरस्यापिव्याहृतिः स्वरितीरिता । आपोज्योतिरसमितिसोमाग्न्योसेत्र्युच्यते । तदात्मकं जग

^स्मृतं^ त्सर्वं रसस्तेजो हयोः अमृतं तरनादिर्हं हृत्वा ब्रह्म सगाधते य दानंदात्मकं ब्रह्म सत्यज्ञानादिलक्षणं । तद्भूर्भुवः स्वरित्युक्तं सोऽहमित्यनुराहतां । एतत्तु वेदसारस्य शिरस्त्वं च्छिरईरि
तमिति । नवतत्त्वंस्यां बिंद्निं । त्रिभुवनमपेतं । प्रकृतं तत्त्रिभुवनं त्रिभुवनमपत्ततं । तत्प्रकृतवचनेमयट् प्रायुर्यणप्रस्तुतं । प्रकृतंतनस्य वचनं प्रतिपादनंतत्स्यादिति हि निरुक्तं । ^एक^
आर्षप्रमाणं श्रुतिपूर्वं शिरो ब्रह्मललाटं चैतिमचोचाम । अन्यार्थं दोगोपतिषमपि । प्रजापतिलोकानभ्यतपत्तेषांतप्यमानानां रसान्प्रावृहदग्निं छायि व्याशा ^२८^

८५

पुमंतरीसादारिस्मिंदिवः सरूपनास्ति सोदेवनाऋ भनपन्नासंतप्पमानानां रसंप्राह्हहग्नेऋचावायोयजूंषि सामान्यादित्यान्न सरुतां त्रयीविद्यामभ्यतपत्तस्यास्तप्यमा
नायारसान् प्राहह्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यइति [illegible] रीस्याख्याकरोतियन: कथयतियस्मात् तया वक्ष्दोगश्रुतिः सेयंदेवनेक्षत हंताहमिमास्ति
स्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपे व्याकरवाणीति।विष्णुगणनचंद्रिकायामिति।विश्वमेतदितियामहत्यसौनामरूपविवरणानि श्रितिः। सात्वमेवनविभ
र्भुपास्त्वंतावन्मनोदयस्तिधामिणी। शितुरितिनेनस्मात्त्वं सर्वज्ञेयः सर्वस्मात्पूर्वेत्रित्रिसंबंकेतिनात्पर्यतुरीयोसि। तथाच वाजसनेयिश्रुतिः। गायत्र्यस्येकपदीद्वि
पदीत्रिपदी। चतुष्पद्यपदसिनमस्तेतुरीयायदर्शिताप्यपदायपरोरजसेसावदोमिति॥ योगयाज्ञवल्क्योपि।तुरीयंतुपदंतस्याः परंब्रह्मणिहंस्थितमिति।विष्णुगगन
वेदिकायामपि।अघ्नश्रथनचवर्णात्मकंजागरादिपदमंवयात्रिधामगं। यस्तुरीयपदपिवद्भिलापनं भावंब्रह्मनखिलेशिजंभसेरति॥ वस्यनेदगायन्याः सोपपत्तिः परांशि
वपरतााविभूतियोगे।वेदगायत्रीतिपाठस्तुमानशब्दस्यस्वत्वादिपाठस्तममूलः।स्वस्वादिकुमातृशब्दस्यजननीवाचिनोग्रहणाद्दन्ने।स्योऽंविविशत्रमातृवाचीतुस्व
पदः।अलंकारस्तुविशेषणसाभिप्रायपरिकरः।।गायत्रीतिविशेष्यस्याभिप्रायतयातदंकुरोपि।विशेषणानामन्योन्यहेतुत्वेनकारणमालापि।पूर्ववाक्यार्थस्योत्तरंप्रति
हेतुतयाकाव्यलिंगमपीति॥ २२॥ संसारभावग्रहणचतुरामारिश्वान्किंपरांतांस्वात्माभिन्नांविदित्वावरुसुमतिभिर्नाहिताहेक्षितिस्य:त्रैकाल्यंवसविषयसरमनवधिस्व
प्रकाशत्वपूर्णात्वाष्ठकः स्यपोगीभवतिगतभवस्त्वप्रसादान्महेश। हेमहेश्वरमहयतिवाप्नुहीयतेमहान्सवाप्यावीशश्चेति।भक्तानुग्रहकारकादिकमथर्वशिरःसुक्र
थकस्माद्व्युच्यतेमहेश्वरोयस्माद्भक्तान्ज्ञानेनभजन्ननुगृह्णातिवचोसंहजतिविसृजतिसर्वान्भावान्परित्यज्यात्मज्ञानेयोगैश्वर्येणमहयतिमहीयतेवामहेश्वरइति॥
कूर्मपुराणेपि।ईश्वराणांमहेश्वरइति।संसाराःसारभावग्रहणचतुरामिति।संसरणात्मकस्यसंसारस्ययोऽसारःभावोजननमरणरूपसमस्तंतस्यग्रहणंग्रहणंहरणम

या

गाथा

३०

पुनराह त्रिरूपं तत्र चतुरां स्वगं स्वं तुरेपश्लेति कोशः। तदुक्तमभियुक्तैः। कूर्मांडवुद्बुदकर्दनकसंकुलोयं मायोदधिर्विविधतत्वतरंगमालः। आद्यस्य मंत्रकुटि
तिफलमेव याति ध्यानसंततिमहावडवामुखाग्नाविति। एवं चवसमाणामप्यिकप्रपंचस्यकरं चित्काकाडुंबलमावयस्यामेवस्फुवितो भवतः। आदिशक्तिमि
ति। तथा च कूर्मपुराणे। माहादेव्युः प्रकृतिः सा प्रधानं बंधः ओको विनियोगपितेन। मायाशक्तिः प्रकृतौ लीनरूपा वेदेषु काकारणं ब्रह्मयोनिः तस्मादेकः परमे
ष्ठी परस्तान्महेश्वरः पुरुषः सत्यरूप इति।। चतुःसंख्यामपि। कूटत्रयात्मिकां देवीं समष्टिव्यष्टिरूपिणीं। आद्यां शक्तिं भावयंत इति। तां प्रसिद्धां पुपकों तां वा। अत एवामंतच्छेदो
पहितिपेसुः। तदुक्तं काव्यप्रकाशे प्रसिद्धोपक्रांतविषयस्तच्छदोयच्छब्दं नापेक्षत इति।। अत एव परामृक्तलक्षणां गायत्रीं वाचं पात्वंचवसमाणखडत्वमप
शिवचक्रचक्रवर्तित्वेन। तथा च बह्वृचोपनिषदि श्रुतिः। सैषा चतुःपदा षड्विधा गायत्रीति। षड्विधत्वं चाथर्वणे भाग्यकांडे परं ब्रह्म चैव गायत्री वासनायुक्तोपसंहा
रेषु छोपनिषदि प्राणुक्तषोढावासनया षडन्वयशांभवीनां प्रदर्शनात्। प्राणुक्तवासनेन पिश्रुतिरपि च। सा षड्विधत्वेमानंत चानुपरमेव परा शक्तित्रकरणेव सते।
स्वात्माभिन्नां विदित्वेति। स्वात्मनो भिन्नां विदित्वा विधाय स्वस्य आत्मनो जीवस्य शिवांशत्वात्तथा विभावनं। अत्र प्रमाणं। ममैवांशो जीवलोके इति स्वात्मैक्यतया
विमृश्येत्यर्थः।। नमुत्सुमतिभिरिति। वपुर्विदेहे सुमतमः। आत्मबुद्धयः। अनात्मनि शरीरेंद्रियसंघाते च प्रत्येकमात्मबुद्धित्वाहंकृत्वेनो क्रियस्य वा प्रतिभानुरु
भूतानुभावयिष्यमाणानां वपुषां प्राबुर्यात्। तैभिः नाहं नाहं कृतिस्यद् इति। नाहंतान आहंताने अर्थस्य न स्पृहन शहेन सुखुबेति मोगविभागात्मभासः सा चासाव
हं कृतिश्चतत्रस्य। विदित्वेति। पूर्वकालवाची विदित्वेति क्त्वाप्रत्ययः। पूर्वं निरुक्तपराशक्तेः स्वात्मैक्यपरामर्शस्य देहाहंभावप्रशमशुद्धसंविद्रूपपराहंतास्थितौ हेतु
त्वेद्रूढमिति। तथा च कल्पांतरे। अनेन मंत्रेण सवितुर्वरेण्यं भर्गो हि देवस्य हितामधीमहि। सद्यः सतां क्लेशहरं हितामधियो हि यो नः सततं प्रचोदयात्। अभिन्नांप्र

राम
३०

पा

तिपाद्येन गणपतीं ब्रह्मणा सह । सोहमस्मीत्युपासीत विधिना येन केनचिदिति ॥ स्वतंत्रकलेन च्छन्नं श्रीमदाचार्यैः ॥ स्वदेहोद्गताभिर्घृणिभिरणिमाद्याभिरभितो निषे-
व्ये नित्ये त्वामहमिति सदा भावयति यः किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो महासंवर्ताग्निर्विरचयति नीराजनविधिमिति ॥ तथा च परमसुभगा परमप्रेमास्पद परमसु-
दारसलनादृशप्रमेयवस्तुतो निरंतरं सहजानंदबोधस्वात्माहंभावभावभावनया विगलितमलत्रयाभिमानः परोहंताशाली परमशिवभट्टारक एव स इत्यर्थः ॥ अन-
एवत्रैकाल्यमिति त्रैकाल्यं भवभवत्भविष्यदात्मकं शब्दवाच्यतीयमानैः कालः चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् सर्वदा प्रतीयमानमित्यर्थः ॥ विश्वप्रसरमिति । विश्वस्य व्यापकस्य शिवा-
दिक्षित्यंतस्य षट्त्रिंशत्तत्वात्मकस्य प्रसरः प्रमातृप्रमेयप्रकारतया वा स्थितिरूपत्वं स्वप्रकाशप्रसरणमिति । सोनिमेषोनिमेषः प्रकाशो निरूढरीत्या ग्राह्यग्राहक संबंधेन तत्त-
दाकारतया स्फुरणरूपत्वेन पूर्ण । अंतर्बहिः सैंधवघनवत्प्रतीयमानमित्यर्थः ॥ अनन्तस्वानवधिर्देशकालाकारैरपरिच्छिन्नमित्यर्थः । परिच्छेदे वलेऽवधिरिति कोशः ॥ बृ-
हद्बृहत् । बृहत्वाद्बृंहयति । यथा चाथर्वशिरःश्रुतिः परं ब्रह्माथ कस्मादुच्यते परमात्मा परमपरंपरायणं च बृहद्बृहत्वाद्बृंहयति वा तस्मादुच्यते परं ब्रह्मेति । शांत्वा । यथा परा-
यां गायत्र्याः स्वात्मना भेदस्तथा पंचभूतमयं विश्वं तन्मयीत्वं सदानदेदरनितं अंतरोक्तरीत्या विश्वस्यापि प्रपंचाकारेण चोल्लसितं ब्रह्मैवेति निश्चितमित्यर्थः ॥ तथा च चिद्गगन-
चंद्रिकायां ॥ सार्वकालिकमिदं जगन्मया भासते विघ्नशक्तरूपया ॥ अंतरंजन निर्बुद्धिदर्पणे वा घरूपमलरूपमत्ययमिति ॥ मुक्तोयमिति ॥ वासनानानुबंधमुक्तिरित्यभिधी-
यते । स्वात्मपरमावस्था जीवन्मुक्तेरपि विघ्नतः इति योगवासिष्ठोक्त जीवन्मुक्त इत्यर्थः ॥ स योगी योगः शिवाहंभावलक्षणो निरूढस्तस्मात्प्रत्यग्वस्तुप्रवणस्त इत्यर्थः ॥ त-
दुक्तं कुलार्णवे । योनिमुद्रानुसंधानप्रस्फुरन्मंत्रवैभवात् । गीर्वाणगणपूज्यत्वाद्योगीति कथितः प्रिये इति ॥ त्वत्प्रसादात्वदनुग्रहेणेत्यर्थः ॥ स्यल्लोपे पंचमी । निरूढा-
श्रुतिरिस्या मदेशस्यैव ताद्दशानुग्रह हेतुत्वादिति भावः ॥ गतः भवः संसारो यस्मात योक्तः ॥ संसारस्येदासारस्य स्वस्वरूपतानुभावेनैव महासारबत्त्वाप्रतिपादनादि-
त्यर्थः । भवति सन्मानं तिष्ठतीत्यर्थः ॥ कंचित्कालं जीवन्मुक्तावस्थां तुरीयतयानुभूय विदेहमुक्तो महासत्तया तिष्ठतीति फलितं ॥ तथा च कौशुमी श्रुतिः ॥ गायत्री

३८

योऽहं सर्वमिदं रूपकम्प्यतदेतत्पूर्णमनश्ववर्त्तिपूर्णमनश्ववर्त्तिनी ॥ निर्मलमतइति । वस्तुतस्तु विभूतिमोगो । अलंकारास्तु पूर्वपूर्वस्योत्तरोत्तरं प्रतिहेतुत्वात्कारणमाला ॥
न्यार्थहेतुकं काव्यलिंगद्वयमपि ॥ ८४ ॥ अथैकेनास्य तत्त्वनिर्णयस्य देशिकेंद्रस्वावकरणीकर्णिकमासंप्रदायक्रमेण धिगमं प्रपंचयंस्तत्र कंचिदुपनिष्ठ
मावर्षे विश्वेश्वरस्तत्प्रकाशात्परमस्ति विनानास्यस्तीति तत्त्वमीमांसारूपमेतत्स्तवपरमगुरोः श्रीगुरवास्यामजालं । स्वचत्मस्तं विहाय स्वरहितमिति वरस्तिवा
मवनतत्वं ये धीराः तर्कयेयुस्तरस्तजनिमृतीराशुवंतं गमोरे: विश्वस्याशिवाद्दीप्तिस्तंतस्येश विश्वेशानु आतविश्वनथ्याचाय्यमौलिरिः ॥ श्रुतिः ॥ अथैक एष हि रुद्रो नद्वितीयाय
तेऽस्थुः सर्वानूदेवानीशत ईशनीभिर्जननी ॥ विश्वस्वराक्तिभिः ॥ अभिचाशूर नोनुमोडुग्धइवधेनवः ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुषइति नस्माद्व्यतई
शानइति । पारावाराणलोपात्रस्याद्दिश्वमीशानः स तु विश्वाधिकः शिवः मानिवेदान्तवाक्यानि तानि सर्वाणि सततमः ॥ विश्वाधिकपराण्येव नैव विश्वपराणि वै ॥ इति
तदुक्तं काशीखंडे । तपारिश्चात्तुष्टिते श्रेष्ठौ कोटयः सप्तमीरितं । तस्माडुपरि वैकुंठो योजनानां प्रमाणतः ॥ भूर्लोकात्तूपरि संख्यातः कोटि षोडश संमितः ॥ यत्रास्ते श्रीपतिः
सात्त्वतां सर्वेषामभयप्रदः ॥ ततस्तु षोडशगुणः कैलासोऽस्ति शिवालयः ॥ पार्वत्या सहितः शंभुर्गणैः स्कंदनंदिभिः ॥ यत्र तिष्ठति सर्वेशः सकलः परमः स्तत्ः ॥
तस्येदेवस्य खेलोपस्वलीलामूर्तिधारिणः सविश्वेश्वर इति ख्यातः लदाशाहृदिदं जागर्ति । मे अधीराः प्रकाशो वस्तुमाणधीरसाधकेष्योविपरीताः इह संसा
रे स्वशक्त्या शवसर्वं विनेति स्वः अकाशो निहकालस्तस्ममलस्पृशः स्तदेविश्वाकारतया स्फुरन्नालक्षणपरिणामः ॥ तदुक्तं लिंगे साशासर्वेश्वरी देवी महदेवो महे
श्वरः इति । तं विनाभ्यदपरं तत्वमनुभावनीयं ॥ नास्तीति प्रकारेण मीमांसारूपं । विचारणार्थमिमानधानोः मानवंधरानशानूस्यौ दीर्वस्याभ्यासस्येति सनंतनादन
त्यपादिति स्त्री प्रत्ययेसुप्त्वन्नामीमांसा वेदांतान्तेष्वानुत्तरमीमांसे वेदांतास्येति अस्मिन्देहेलदूपं हृपयति हृपं तस्याः हृपं तत्सिद्धांतं इत्यर्थः ॥ स्वचत्मक्तामिति ॥ स्व

राम.
३८

८९

स्वाध्यत्वविषयां सर्वं तदवतस्व सर्वं स्तनयेकमेंद्रियाणं तत्र गात्रत्री अद्वपीककनमिति इदं संध्यसु वीतापण्यावागथ्यैव हारकारणत्वात् शक्तिर्जगद्व्यापिनीमहोजात्म
कतां गतात्वशिवेतन्तो मिवीजं परमिति सुंदरी महिम्नः स्तुतौ क्रोधमुनिभणितरीत्या विद्याकारतम्भवत स्वाध्यत्वविषयेत्वात् तदुक्तं योगवासिष्ठे प्रागकारणमेकास्थु
सर्गादौ सर्गलीलया। स्फुरितकारणं भूतं ब्रह्मतत्त्वं स्वयमात्मनो निष्कारणकमेवातो ब्रह्मकल्पमिदं स्थितं। प्रमत्तमेवनिर्मातुलसंशास्त्वनुमादयइतिचापर
मगुरोस्त्वेतेन तेतावता प्रबंधेन निरूपितं गुरूणामपि परंपरा गुरुत्वात्परमगुरुत्वात्परमगुरुत्वं तदुक्तं सौभाग्यमंजर्यां। स्वस्ति श्रीमत्परमशिवपादाब्जपारंप
र्यक्रमेण स्वगुरुपादसंचुर्जयावन्नावस्त्रणोमीति। श्रीशिवाम्नायमालिनीति। श्रीः शरणागतजनपशुपाशपाठनपटीयसीतयोपलक्षितानिमुखानितत्र स्थं॥ स्वाम्नायाः
पूर्वदक्षिणपश्चिमोत्तरानुत्तरामस्याः पंचशिरीशानादिमुखैः प्रत्येकं जायमानाः संप्रदायाः तदुक्तं वामकेश्वरतंत्रे पूर्वपश्चिमरसांचयन्त्रं वानिरुत्तरमिति। प्रतिचक्रं वि
भावनाविभागस्तु दक्षिणमूर्तिसंहितायां पूर्वसिंहासनगताविद्याजप्यामहेश्वरि। देवितस्यास्येनजप्येतेनच्छूणप्रियेइत्यादि। दक्षिणास्येनदेवेशिललितात्रिपुरसुन्दरा॥
कामेश्वरीचक्रेनेत्रामयाद्यापि जप्यतइत्यादि। विपश्चिमचक्रेणमयाद्यापिप्रजप्यतइत्यादि॥ अथेशानेमचक्रेणममाद्यापिप्रजप्यते। विद्यानां पंचवर्कं देवि त्रिषु लोकेषु दु
र्लभमित्यादि तदुक्तं मदुक्तसांवगीते। पंचशिखरगतकोशकल्पतरुकल्पलतादिविकारं॥ परपवित्रहस्तस्यामयमलपनाशमिति। विशेषस्तु मातृकाखंधविवेचनेर्लम
हाम्नायविद्यासारः स्फारस्वरूपइत्यत्र व्यक्तीकरिष्यते। तेषां जालमिवजालं। अनेनायः। संश्लिजालं स्यादितिकोशः। यथाजालस्यविस्तरे पृथक् प्रतीयमानास्त्रपितंतवोमुख्य
वलेमेघ ग्रासा कवलीकृताः संहृताः कवलीकृतास्तथासकलसंप्रदायाः षट्त्रिंशत्तत्वात्मकतयापरिणताः अपितद्रदनसारोजयंवककरूपायेत्यर्थः। तदुक्तं गुरुपादुकास्तोत्रे
वागणमूलवलयेसुग्रासाः कवलीकृताः एवं कुलार्णवज्ञानं पादुकायां प्रतिष्ठितमिति महत्क्रसांवगीते। चंद्राशूर्करसल्लखे। खिवगुहांकुंडे कवासत्रियः सुंडालः सठ
यामकेसरइवव्योमतन्सेरितीकैः विद्यार्हितचुर्घुराव महाभीमो भवानीपतिर्नीमार्रं कुरुधीरमन्मयगजस्त्वो मैकपंचाननरति। विहायस्तत्को वस्त्वर्थः॥ अन्यदपीत्यर्थः॥

धा

न नसतला

८०

सहितमिति। सवकाशवजेमन्यन्तर्वं तत्वमसीत्यादि विमयमस्तीतिनकेयेपुध्येघदि। वमितस्यार्थस्यान्यथाविभावनं चरेयुः। विधिनिर्मन्त्रणेनेति संत्रम्भार्थे लिङ्। संत्रमः
संभ्रमो त्वरणं। अवधारयेयुरित्यर्थः। ते दधीचाशिष्याः कलिबलकलुषितावा। तदुक्तं कौर्मे। स्वमुस्त्कानुविप्रर्षिः शशापेश्वरविद्विषः। समागतान्ब्राह्मणांस्तान्दक्षसाह्य
य्यकारिणः। यस्माद्बहिष्कृता वेदा भवद्भिः परमेश्वरः। भविष्यथ त्रयीबाह्याः सर्वेपीश्वरविद्विषः। निंदंतो ह्येश्वरं मार्गं कुशास्त्रासक्तमानसाः। मिथ्याधीतसमाचारा मिथ्याज्ञा
नप्रलोभिनः। प्राप्य घोरं कलियुगं कलहैः परिपीडिताः। त्यक्त्वा तपोबलं कृत्स्नं गच्छध्वं नरकान्पुनः। भविष्यति ऋषीकेशः स्वांशिनेपि पराङ्मुख इति। तत्रैव कुर्वंति वा वनाराणिब्रा
ह्मणानां कुले प्रभवे। दधीचिशापनिर्दग्धाः पुरा दक्षाध्वरे द्विजाः। निर्दग्ध मया देवं नामसौ विश्वेन सह इति। [illegible] तोरेपि पुरुषोत्तममाश्रितः शिव
निंदापरा द्विजाः। कलौ युगे भविष्यंति त्वागानत्र नमाधव इति। तेनैव प्रस्तुत स्कांदे शंकरगीतायां। नेत्रेन पूजावेलायां न रवत्स वहिष्कृत इति। कोशावितिशंकायां तत्रैव। दधीचिन
गौतमेन मेथका ब्राह्मणाधमा। कलावपनरीयांति निंदकास्ते वहिष्कृता इति। कलौ रुद्रो महादेवो लोकानामीश्वरः परः। न देवता भवेन्नृणां देवतानां च दैवतमिति।
लैंगेपि तस्यैव कथितानि इत्यर्थः। यथा नैयायिकवैशेषिकयोर्निमित्तानादिगुणवानुकार्य्यलिंगानुमेयोनंतेभ्यो जीवेभ्यः पृथगीश इति। पातंजलीयानां क्लेशकर्मविपा
कप्रस्तुतो ह्यनादनात्मा जीवेभ्योन्य इति। सांख्यानां निर्लेपः पुरुषो किंचित्करः प्रकृतिमयमिदं सर्वं वकुलं चेति। जैमिनीयानां तु कर्मैवपियोगीश्वरः परमाणवादिकार्यं विश्वमिति। ये
चान्ये वितन्वन्तुणुः। तर्हि ते कुतार्किकाः। इह संसार एव। द्विधा हत इह शब्दव्याभीत्यर्थ योतमति। पुनः पुनरित्यर्थः। अंगभारैरिति। अंगानामवयवानां भारो भरणरूपस्य पोये
षु तैरंगभारैर्देहैरित्यर्थः। देहानां बहुत्वमपि पूर्वनिरूपितं वीप्सासमभिहारं द्योतयति। यद्वा। अंगेगेति संबोधनं। खः पादः पार्ड अदेहैर्भोइति कोशः। भारैः प्राकृतवयेः। जन्म
न इतिनान्निरूपणादि सिद्धो जन्मे वाची। त्रियमत इति मतिः। कृतिकि सिद्धा। ताश्च ताश्च ताः जनिमृतीर्जन्ममरणानि। अनुभवंतिलभंते कोऽर्थः। एतावता त्रवंधेनव्यवस्थापित
मेतत्स्वानुभवैकवेद्यं विहायान्यदात्मनोपि तत्वांतरं संभावयतामेव पौनःपुन्येन संसारक्लेशानुभव इत्यर्थः। तथा च छांदोग्यश्रुतिः। तामीमानि क्षुद्राण्यसकृदावर्तीनि

मृता॥ नित्यं निजायस्वकीयस्वेनेति॥ मुंडकश्रुतिरपि॥ एतच्छ्रेयो येभिनंदंति मूढा जरामृत्युं ते पुनरेवापियंति॥ अविद्यायामंतरे वर्तमानाः स्वयं धीराः पंडितंमन्यमानाः इति
॥ शकुनीनामिवाकाशे वारिचरस्य वा पदं यथा॥ न दृश्येत तथाज्ञानविदां गतिरिति श्रुतेर्नरोक्तेरणुः पंथा विततः पुराणः इति विक्षिप्यमन्येनास्य पथस्त्वेकैकशरणः इति भा
वः॥ वाक्यार्थहेतुर्कर्काम्यलिंगमलंकृतिः॥ १५॥ अथेत्थंतत्त्वं प्रतिपाद्यैकेनतत्त्वांतरशंकां निराकरोति॥ नब्रह्मा विष्णुरुद्रौ सुरपतिरमरा नागसुरा नैव पृथ्वी नापो ना
ग्निर्नवायुर्न च गगनतलं नो दिशो नैव कालः नो वेदा नैव यज्ञा न च रविशशिनो नो विधिर्नो विकल्पः स्वज्योतिः सत्यमेकं जयति तव पदं सच्चिदानंदमूर्तेर्न तु स्त्यपावंद्य
मशेष्या गापथ्या पूर्वमकल्पमदिति ब्रह्मेव कथं न स्यादत आह॥ न ब्रह्मेति॥ ब्रह्मापि नान्त्युक्तं कूर्मपुराणे॥ समन्वियोगतो ब्रह्मा देवो मद्भावभावितः॥ दिव्यं तेज्ञामकैश्वर्यं
सर्वदा वहति स्वममिति॥ वासिष्ठेपि॥ यामेष्वपि निष्ठाकानितिन्नन्द्या॥ निर्देवानामवमो विष्णुः परमस्त्वदंतरेण स्ववीश्वमादेवमादिति वहुव्रह्मणो॥ नारायणो नारायणोपनिषदि
वा पतिं विश्वस्यात्मेश्वरमिति॥ महोपनिषदि च॥ एको ह वै नारायण आसीन्न ब्रह्मा नेशान इति॥ अथर्वशिरसि च॥ यो वै रुद्रः स भगवान्यश्च सर्वमिति विष्णुरुद्रावा कथं न स्या
दत आह॥ विष्णुरुद्रावपि न॥ अत्र मैत्रेयश्रुतिः॥ तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरित्यथ यो ह खलु वा वास्य राजसोंऽशः सोसौ स योयं ब्रह्मा यो ह खलु वा चास्य तामसोंऽशो
स योयं रुद्रः अथ यः खलु यो वा वास्य सात्त्विकोंऽशः सोसौ स योयं विष्णुरित्यादि॥ नमो वा इदमेकमासेति श्रुतिप्रयुक्तनमोधिष्ठानुर्ब्रह्मादिभ्यः परतया विवक्षितत्वात्॥ ब्रह्मविष्णुशिवा ब्रह्म
प्रधाना ब्रह्मशक्तयः इत्यादिनोक्तत्रयाणां शक्तिविवर्तभूतस्य मर्यनेनतत्रेन त्रयस्यैव व्यवस्थापयिष्यमाणत्वाच्च॥ सूतसंहितायामपि॥ उमाद्वियरहाद्रुद्रात्रिनेत्राच्चंद्रशेखरात्॥ नी
लग्रीवात्परानंदान्मोदानंडवर्जिना॥ ब्रह्मविष्णुमहादेवैरूपस्यागुणमूर्तिभिः॥ तथापप्यापरान्नैरितिप्राणावतीश्रुतिरिति ब्रह्मविष्णुमहादेवैरूपस्यागुणमूर्तिभिः॥ तेन च विवक्षि
तेपरत्वे गुणिरुद्रशंका॥ नाभेर्यं तु ब्रह्मविष्णुभ्यां तस्य पन्नासत्त्वविशेषप्रदर्शनार्थं॥ तदुक्तं सूतसंहितायां॥ तस्मात्पिंडवद्धि शास्त्रमूर्तिः परस्य तु स्यान्नो तुल्यान्यमूर्तिभ्यो लक्ष
त्ये मुनिसत्तमाः॥ परत्वं तस्य नामानि ब्रह्मा सत्यामुनीश्वराः॥ त्रिमूर्तीनां तु रुद्रस्याप्यभिधानानि सुव्रता इति॥ शिवपुराणेपि॥ स एष भगवानीशस्तस्तोराशिरनामयः॥ अनादि

सचास्कन्नायनादेव शिवात्मास्वेच्छया चिरं । नारायणाख्यामभजद्भक्तिरूपः प्रजापतिः

४१

निधनो धाता धूतर्यकोचको विभुः ॥ परमैश्वर्यसंयुक्तः परमेश्वर भाषितः ॥ तच्च तया विष्ठितः शम्भवत्वविज्ञेयं स्पर्शं कृतः ॥ तन्नामनामातद्भक्तत्कार्यकारणं स्मृतः ॥
ततुल्यव्यवहारश्चेन्नदा तापरिपालक इति । वस्तेतेवोज्ज्ञात्वनित्या खंडउपकारादि स्मृत्वा । कूर्मपुराणेपि । योपि नारायणोनंतो लोकानां प्रभुरव्ययः । ममैव च परा मूर्त्तिः क
रोति परिपालनमिति । वासिष्ठेपि । द्विपनेहरि रप्यन ॥ ध्वंवोप्यभावमायातीति वा । न वेशानादिपदानामिव नारायणादिपदानां साधारण्यं । अन्यथा हि विष्णुपुराणे ब्र
ह्मा नारायणाख्योसौ कल्पादौ भगवान्यथा ॥ नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः ॥ कूर्मपुराणेपि । अवाप्य संज्ञां गोविंदात्स्वयंभूर्योनिः प्रजापतिः । नारायणाख्यो
भगवान्यथा पूर्वं पितामह इति । आश्वलायनस्मृतावपि तस्माद्दंडो दक्षिणस्तु ह्यो शिवाख्यो चतुराननः ॥ सर्वलोकस्य निर्माता ब्रह्मविश्वसृजां पतिरिति । एवं च शक्तिरूप
तापन्नयोः सिद्धावेस्पनेच । महोपनिषदो पि । पराशिवपारगोनारायणे समर्पयेन । ननु प्रनदहनो हवैदेवो दाक्षिरिंद्रस्य त्रिमं धामोपनगामेत्यंद्रस्यैवोपपादित्वादिंद्र
कथं न स्यादत आह । सुरपतिरिंद्रोपि नाकूर्मपुराणे । यो प्यशेषजगच्छास्ता शक्रः सर्वामरेश्वरः ॥ मत्तेनोपलदो देवो देवनियोगतस्तथा । सनेंद्रः शतमन्युः आत्मः प्र
सामान्वमितमर्थः ॥ अत्रान्वयचैतोपनिषत् । स एतमेव पुरुषं ब्रह्म ततमपश्यदिदमदर्शमिति तस्मादिदंद्रो नामेदंद्रो ह वै नामतमिदंद्रसंतमिंद्रमित्याचक्षत इति वा । इंद्रः के
दाविदस्तु विमर्दर्पस्तु उपमदा भिमानानुग्रहाया विभूतं यस्तस्यं महादेवं दृष्ट्वा दृष्ट्वाप्यनर्गतमोहो है मवत्यानुकाल संतिहितयोपदिष्ट इति नवत्कारिणामुपनिषदि ।
वस्तेचननुकतिदेवा याज्ञवल्क्येतिदि ग्धशाकल्य अश्नेपाद्यवल्क्यो कोवस्वादयो देवताः एव कथं नस्युरत आह । नामैराद इति । कूर्मपुराणे । यः सर्वास्त्रसंनाथस्तापूस्तानां फल
प्रदः ॥ मत्नियोगाद सौ देवो वर्त्तते निःकृतिः सदेति । यस्त्वरः पिशाचा च स्थिताः शास्त्रेस्वयंभुव इति वा । वासिष्ठेपि । दानवा अपि दीप्यंत इति । नान्विमं पृथिवी सर्वेषां भूतानां
मधिष्ठितिभूरेव कथं न स्यान्न इमा आपः सर्वेषां भूतानां मधिष्ठितापस्वकथं न स्युः । अयमग्निः सर्वेषां भूतानां मधिष्ठितिरग्निरेव कथं न स्यात् । अयं वायुः सर्वेषां भूतानां मधिष्ठिति
वायुरेव कथं न स्यात् । अयमाकाशः सर्वेषां भूतानां मधिष्ठिताकाश एव कथं न स्यादित्यत आह । नैव पृथ्वी नापः नाग्निः न वायुः गगनतलमाकाशश्चन । तलशब्दोन्यभूतेष्वो
कूर्मपुराणे । आदित्या वसवो रुद्रा मरुतश्च तथाश्विनौ । अन्याश्च देवताः सर्वा मच्छास्त्रेणैव निष्ठिता इति । वासिष्ठेपि । ध्रुवोप्यध्रुवजीविनः । अम
राअपि मायं तदिति । तदुक्तं रामायणे । ब्रह्मलोकेनुगतानां [illegible] त्यवर्चसे । भास्वते सर्वभिदायस्तौ प्राय वपुषेनम इति । एष ब्रह्मा च विष्णुश्च
शिवः स्कंदः प्रजापतिरिति च । ननु ह्यद्याह प्राजापत्यादेवाग्याः स्करायतत्तः कानीयसा एवदेवा ज्यायसा असुरा इति ज्यायसा असुरा एव कथं न स्यु

एम ४१

८२

स्पष्टविष्टार्थः। नदुक्तं पद्मपुराणे। न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न मे नभश्चेति। वासिष्ठेपि। धरापि यातिवैधुर्यमिति। सुष्प्त्यपि महमुडाश्रुशीप्यते तारकाच्छ
दीति। आमापिलीयवेनंन इति। नन्विमा दिशः सर्वेषां भूतानामाश्रितिर्दिश एव कथं न स्युरत्राह। नो दिश इति। तथा च श्वेताश्वतरश्रुतिः। एषो ह देवः प्रदिशोनु सर्वा इति श्रु
यते ऽपि रपि। श्रुतिश्चासौ नराहंतरं चाविशद्दिशश्चान्तरं ब्रह्मा विशदिति। वासिष्ठेपि। दिशोपि हि न दृश्यन्ते दिशोप्यन्योपदेशभागिति। एतेन सर्वासां मधुविद्यानां स्थूलान
यत्नेनेदं वीमत्स्येनावतत्त्वेन च पञ्चविप्यमाणत्वानुपादेयत्वमिति भावः। गौणत्वं वा सांतत्वं तरब्रसिद्धं। नन्वस्तु अस्मादीनामुक्तानां कालपरिनिष्ठित्वादंतत्वं। कालः स
जनिभूतानि कालः संहरति प्रजा इति काल एव तत्त्वमस्त्वत्राह। नैव काल इति। तथा च श्वेताश्वतरश्रुतिः। तमाहुरग्र्यं पुरुषं महान्तं स एव काले भुवनस्य गोप्ता। विश्वा
धिकः सर्वभूतेषु गूढः स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रं। स विश्वकृद्विश्वविदात्मयोनिः
कालकालो गुणी सर्वविद्य इति। स्कन्दे कूर्मपुराणे। युगमन्वंतरादैव तिष्ठंति मम सम्मनेय परमेश्वेवपराह्नविकालभेदा स्त्यापरे इति। वासिष्ठेपि। कालोप्यकालता
याति निमन्त्यापि प्रतीयते इति। नन्वस्तु निष्ठं तु कालस्य सापि वेदादौ सिद्धत्वात् निहीषाद्युपाधिभेदश्रुतीति विषयत्वादस्तु वेदानां तत्त्वमित्यत्राह। नो वेदा इति तथा च श्रुतिः
मनो वाचो निवर्तन्ते अप्राप्य मनसा सहेति। नन्वस्तु श्रुतीनां कर्मप्रतिपादकानामनित्यत्वादतत्त्वं। कर्माण्येव तत्त्वमस्त्वत्राह। नो वेदा इति। तथा च श्रुतिः। यतो वाचो
निवर्तन्ते अप्राप्य मनसा सहेति। नन्वस्तु श्रुतीनां कर्मप्रतिपादकानामनित्यत्वादतत्त्वं। कर्माण्येव तत्त्वमस्त्वत्राह। नो वेदा इति। तथा च श्रुतिः। नैव यज्ञा इति। कर्मण
एकामानामनित्यत्वाद्धोपपादकत्वाद्वे स्वर्थः। नन्वस्तु कर्मणामनित्यत्वेनातत्त्वं। सूर्याचन्द्रमसोः कर्मिणामुपेयत्वमात्मस्मरणादित्यः सर्वेषां भूतानामाश्रिति। श्रु
यं च द्रमसः सर्वेषां भूतानामाश्रितिं च श्रुतत्वात् कारीतात्तु तयोस्तत्त्वमत्राह। न च रविशशिमाविति। तथा च ते धूममभिसंभवन्तीत्यादि सस्यते धूममभिसंभवन्तीत्यादि
मार्गे श्रुतिरीत्या चंद्रस्य तनयोर्देवयान पितृयानत योपाय हृत्यत्वेनोपेयत्वाभावादिति भावः। तथा च कूर्मपुराणे। यस्य भासमयतिसर्वतः। सूर्यश्चेत्थं वितनु

भासा जगत्सर्वं प्र

५८

१२

तेश्णास्त्रेणैव स्वयंभुवः॥ योपि मंजीवनो नृणां देवानां ममताकरः॥ सोमः स्मम्निर्योगेन चोदितः किलवर्त्तते इति। एवं च देवानां नान्द्वैतसिध्द्यौपयिकत्वं प्रस्तुतविरो
धकत्वमिति सिद्धं। तथा च पद्मपुराणे। सनत्कुमारं प्रति व्यासः॥ निर्माग्निरेव त्रिणो विप्राः संति ये गृहमेधिनः॥ तएव सर्वफलदाः सुराणां कामधेनवः॥ भक्ष्यं भोज्यं च पेयं च यद्
यदिष्टं सुपर्वणां॥ अग्नौ हुतेन हविषा तत्सर्वं लभ्यते दिवि॥ नान्यदस्ति सुरेशानामिष्टसिद्धिप्रदं भुवि। दोग्ध्री धेनुर्यथा नीता सुखदा गृहमेधिनां॥ तथैवाज्ञानवान्वह्निर्दे
वानां सुखदो भवेत्॥ त्रिसंध्यास्वेन विभूतिप्रविष्टा हृदयं नृणां॥ ततो न जायते भक्तिः शिवे कस्यापि देहिनः॥ तस्माद्धि विरिष्या नैव जायते शूलपाणिनः॥ यथाकथंचिज्ज्ञानापिम
ध्ये विछिद्यते नृणां। ज्ञानेवापि शिवज्ञानेन विघ्नास्तो भवेत्फलमिति। प्रपंचितं चैतत्तदुपर्यपि च वादरायणइत्यधिकरणे। नद्यो देवानां प्रत्यवायो न सन्नद्धभवदिति। वाजसनेयिसूत्र
मधिकृत्य तेन कर्मविहीनानां मनुष्याणां परतंत्रत्वमभवदिति। वस्त्रेणेवायमर्थस्तत्र तत्र प्रवृत्तः॥ अत एव देवानां प्रियमिति मूर्खेइति शाब्दिकाः॥ पुनस्तत्रैव मुनीन्प्रति सूतवाक्यं। इष्टा
पूर्त्तादिकर्माणि ते नाचरंति मानवः॥ शिवार्पणाविपाका मानुपरित्यज्य यथाविधि। अनुग्रहात्तेन शंभोः सुहृदो जायते नरः॥ ततो भीताः पलायंते विघ्नं हित्वासुरेश्वराः इति। वस्तु
वो नरत्वास्मिन्नर्थे बीजगर्हणे पितृणां श्रुतिः॥ नन्वमासं तु ब्रह्मादयस्तत्त्वं तदुपास्तिविधानस्येव श्रुत्यादिपठितस्याग्नीमांसकैः अभिप्रेतास्तु नत्वमित्याह। नो विधिरिति। विधिप्रेरणमात्रापन
मिति विधिनिर्मंत्रणेति सूत्रे व्याख्यातारः॥ इदं तु तन्नसूत्रस्यमधीष्टमर्थः सत्कारश्चर्वेव्यापार इति व्याख्यातं। विधानं प्रेरितपश्चितदुपास्तिरित्यर्थः॥ विधिविधाने देवे पीतिकोशः॥
विधाय तेनेति विधीयतइति वा। मुख्यत्वार्थं च यमपि स्वपर्यइदं। विधेश्च क्रियाकारककलापसमन्वायाशु विनाशिधर्मितिमानतत्वं। तथा च कृदंगस्मृतिः॥ अथ यद्यमेयमाभाख्या पूर्त्ति
रहितमित्युपासते ते धूममभिसंभवंति धूमाद्रात्रिमित्युपक्रम्यानत्तलेवं छमासिस्थित्वा मुक्ताथैतमेवाध्वानं पुनर्निवर्त्तंत इति कर्मणां नरकं कृत्वा रमणीयचरणानां रमणीयां योनिमु
क्त्वा कपूयचरणानां कपूयचरणां योनिं प्रपंच्य अत्रैनयोः पथोर्नकतरेण च न तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भवंति जायस्व म्रियस्वेति। नन्वस्तु सकामकर्मणामारंभकत्वान्नतु
कचिद्भूमाद्याः कचिदहादिः कचिन्तदुक्रमपीति तत्पोविकल्पएव किं न स्यादत आह। नो विकल्प इति। विकल्पो ह्यतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीतिको

राम:
७२

८५

पिद्धयावलंबीत्याशुर्वापुरुषोवेतिरूपः संशयस्स्यान्नह्यस्यथार्थेन्नमातत्वंभवितुमर्हति। तर्हि जितमनीश्वरवादिभिर्नास्तिकैरित्याशंकांपरिहरन्नाह योऽयं श्रमादिविषयगुणीनांपृथ
पक्तविषयतांविशदयति। स्वंज्योतिरिति। सोमिवियदं स्वरूपमित्यर्थः। आत्मस्वरूपंस्वानुभवैकवेद्यं। स्वत्र भाणमयान्मैकगतानानांमतिरैवात्रसान्तेरणी। किंप्रमाणेवंचोऽभि
व्यस्वप्रकाशोविदात्मावि। नहिवेकत्वनिंज्योतिर्दीपालोकमपेक्षत इति। तथाचवाजसनेयिश्रुत्यापूर्वेक्तिरीत्यापवयिस्तेणैवमधुविभातुस्मात्स्वात्मायमात्मा सर्वेषांभूतानाम
धिपतिरिति श्रुत्युक्ते कौषीतकिश्रुतिरीत्याप्रज्ञात्मैवसंनिरूपितः। ननुवेनत्स्वयाकुतोनुक्तंनैतुभूतमत्राह। ज्योतिरिति। दीप्त्यर्थधुतेरुणादौद्योतनार्थेनिपातंज्योतिः। अत्र
वाजसनेयिश्रुतिः। नदेवज्योतिषांज्योतिरिति। मुंडकश्रुतावपितस्यभासासर्वमिदंविभातीति। तस्मात्तैत्तिरीयोपनिषत्सुपरोक्षस्वखुजेत्यादिनाचतुर्थपंचमस्कंधोक्तार्थस्यैवप्रपंचितः। यदापश्यः
पश्यतेरुक्मवर्णंकर्तारमीशंपुरुषंब्रह्मयोनिं इतिकठे एवंपरपुरुषपदस्याहवर्गेशस्यपुरुषस्यतत्के नाहरणीयतांप्रतिपादयन्नेति विवक्षायामनःशरीरंज्योतिर्मयोहि श्रुत्योम
परस्पंनियतमः सौम्यदोषादितिविभूतिमोगेवनीयाविभूतिनिरूप्यमनीमस्यपरवस्तुनोपागस्थलमपिविविक्तस्वपरतरविपतीमत्र विवक्षितंतद्रहामेवपरशितिं श्ययमेवा
र्थः। पुनर्पैताकमंसृषयोऽस्मात्कामोयत्रतत्तत्रस्वपरमंनिधानं। हरुचतस्यियमचिंत्यरूपमित्यादिनेशंपुरुषंब्रह्मेतिप्रतिपाद्यपश्यन्निहैवविहितंगुहायामितिप्रबोध्यतत्स्तुपश्य
तिनिष्कलंध्यायमानइति। ध्यानमुक्त्वा २ योगरात्मावेदयितव्योयस्मिन्प्राणःपंचधासंविवेश। अरणेश्चिसंस्थमोतंशज्ञानानांयस्मिन्विशुद्धेविभवत्येषआत्मेतितन्त्रस्रुत्यगवस्यदा
थीनुभवात्मानरिशत्वड्गुखतपाज्ञाणानांवह्निरूपमिहविवक्षितंयजनमेवनिरूप्यतस्मादात्महंघ्रुर्वमेहमिकामइतिदीक्षितनारिमहाशेवाराधनमपियद्शपन्नुपज्य
पूजादिविभागेनयजनंवहिरंगत्वात्सारत्वाद्ध्यानहेतुरयंवेद्यपुरुषमोभिन्नोऽस्तुपरमशिवइत्याशंक्यसर्वेदेवनमरमेधामयत्रविश्वंनिहितंभोतिशुभ्रं। उपासतेपुरुषंयेह्यका
मास्तेशुक्रमेतदतिवर्तंतिधीराः इत्यादिनिगमेनपरशिवपरत्वमेवतच्छुभ्रंज्योतिषांज्योतिरितिस्वंज्योतिः येनपूर्वपृष्टिज्ञानतः प्रतिपादितः। एवंचवस्तुमारणापुरुषपदस्या
पिसामान्यवृत्तिःसंगताभवति। कोऽर्थः। आत्मामनसासंयुज्यनेमनइंद्रियमर्थेनेतितंत्रांतरोक्तप्रतिपाद्यानत्रतत्त्वामार्गेणवैतत्स्वप्नेत्रभोगीतिविज्ञानभैरवः

इंद्रियेण

सा

ज

(तत्र)

हारकोक्तरीत्यायत्रमत्रमिलितामरीचयस्तत्र विभुरेवर्जं भजेदिति लोचारणक्रीत्यावस्वरश्मिचक्रवालांतरालस्थो विश्वकृष्णेन विष्वनयोजें भगणमित्यर्थः॥ अत
एवाहसत्यमेकमितिनय्याथर्वणश्रुतिः॥ कंदोहं स सोहमिति॥ कैवल्योपनिषदि॥ अनंतसत्यंपरं ब्रह्मेति॥ एकं अथर्वशिरःश्रुतिः॥ अथ कस्मादुच्यते एको यः सर्वान्प्रा
णानुसंभक्ष्य संभक्षणेनाजः संसृजति विसृजति वनीर्यमेकेदस्तिणाः प्रसंचरंच प्रांचो वृजंस्येके तेषां सर्वेषामेव संगतिसाकं स एको भूतश्चरति प्रजानां तस्मादु
च्यते एक इति॥ शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्य समाप्तार्थवंशिखेनीतिवा॥ अत्रहेतुगर्भविशेषणमाह॥ सच्चिदानंदमूर्तेरिति सदैव सोम्येदमग्र आ
सीदिति॥ नित्यं विज्ञानमानंदं ब्रह्मेतिवश्रुतिरीत्या सच्चिदानंदरूपामूर्तिर्यस्य तयोः क्तानवपरं लक्षणमित्यर्थः॥ ध्यानिध्यानमितिपावनमुत्सुकमित्यर्थः पूर्वोक्तमि
थः॥ कस्मिन् बिंदुचित्तयेमुक्त विदोरेवपर शिवव्यापिपरत्वात्॥ तथाचाथर्वशिरःश्रुतिः॥ अथ कस्मादुच्यते शुक्लं यस्मादुच्चाप्यमानाण एव क्लेदयते क्लामयति च तस्मादुच्य
ते शुक्लमिति॥ जयति सर्वोत्कृष्टं तदेतत्तृतीयस्थानमितिश्रुतिप्रसिद्धमित्यर्थः॥ अत्र व्याख्यानस्य हृतौशक्तेरभावाद्भावरवार्थः॥ तथा च महासतेत्रसप्रथि नडक्तं पुराणा
नंदमुनीन्द्रैः॥ सितशोणविंदुयुगलं विविक्तं शिवशक्तिसंकुचत्प्रसरमिति॥ कूर्मपुराणेपि॥ अहं हि भगवानीशः स्वयं ज्योतिः सनातनः॥ परमात्मा परं ब्रह्म मत्तो ह्यन्यन्न
विद्यत इति॥ एवमेके वदंति नारायणमथापरे॥ इंद्रमेके परे प्राणान्ब्रह्मणमपरे मनुः॥ ब्रह्मविष्ण्वग्निवरुणाः सर्वे देवास्तथर्षयः॥ एकस्यैवाथ रुद्रस्य भेदास्ते परिकीर्ति
ताइतिवा॥ शिवपुराणेपि॥ सृष्टेः प्रवर्तको ब्रह्मा स्थितेर्विष्णुर्विमोहकः॥ संहारस्य तथा रुद्रस्त्रयो नित्यानियामकः॥ तस्मात्त्रयस्त्रेकं कथ्यंते जगतः कारणत्रयं॥ कारणत्रय
हेतुश्च शिवः परमकारणमिति॥ स्कांदेपि॥ ब्रह्मविष्णुश्चरुद्रश्च परतत्त्वविभूतयः॥ एषां त्रयाणामधिकः सर्वकारणमीश्वर इति॥ योगवासिष्ठेपि॥ ब्रह्मार्कविष्णुहरश
क्रसदाशिवादि शांतौ शिवं परममेनदिहैकमास्ते॥ सर्वोपाधिभ्यमयवशाद्विभक्तरूपचैतन्यमात्रममनुस्मितविश्वहंसमिति॥ अग्निरग्रे प्रथमो देवतानामिंद्रो पानो वसि
तसराणां॥ विष्णुस्त्विरिंद्वयमरत्न्याद्दरितपरिच्छिन्नमेव व्यंवक्तीतिभावः॥ अत्रौतरेय श्रुतिः॥ एवमेव प्रलेशरंद्रएषः प्रजापतिरेते सर्वे देवा इमानि पंचमहाभूतानीत्या

दिरूपसंहृतो निरुक्तपञ्चात्मपरैवा। पराहमनुत्तमपदं तो। ब्रह्मगतिनारं सर्वेषामरणीयां समरणोरपि। हृत्क्रमं भं स्वमधीगम्यं विद्यानुरूपं परं। इति सर्वोत्तयोमितमानिरूप्य।
एनमेके वदंत्यग्निं मरुतोन्ये प्रजापतिं। इंद्रमेके परे प्राणमपरे ब्रह्मशाश्वतमिति। वैदिकव्यवहारं प्रदर्श्य। एष सर्वाणि भूतानि पंचभिर्व्याप्य मूर्तिभिः। जन्मवृद्धिक्षयैर्नित्यं सं
सारयति चक्रवदिति। अलंकृतिं तु समर्थनीयस्य ब्रह्मादिनामतत्वस्य स्वयंज्योतिष्ट्वादीनां समर्थने रूपं काव्यलिंगं। स्वयंज्योतिरादीनां विशेषणानां। ताभिरायतया परिकरोपि।
सविशेषणानं दम्रर्तिपदार्थहेतुकमप्यनेन पात्वसमर्थ्यनानुविभूतियोगे विभूतित्वेनेषां विवक्षितत्वात् लिंगेष्वाभासत्वात्क्षेपोपि तस्य मूलस्तरणं नुवक्ष्यते॥ १६॥ ननु तत्रास्ति द्वौ न
प्रतिपाद्यानि भूयां। सितत्वो निश्चयं ते कथमेकमेवमपरं सर्वेषां कृष्टं त्वयावधारितमिति सारांशयाह। शंभोमेहांतिकायस्वमतिविभवतो विवेगी वाग्रमाणैर्मीमांसेनेभवंतं बहुमतजन
केराहतात्मशुद्धविधेः। अन्योन्यस्पर्द्धिनस्ते कथमिह भवतस्तत्वमीसुः स्तनेजः स्तवीतीतं विकल्पयहरहितमजं मानतकाद्यागम्यं हे शंभो इति। शंभुरुक्तलक्षणः। स्वमतिविभवतो
स्वर्वगवाद्गति। आन्वीपाति तिस्तस्य विभवतो विभ्रत्याहेतुनेत्यर्थः। स्वदीस्वल्पोगर्वोभिमानो येषां नयानसुस्तयोक्ताः। स्वबोद्धुत्वश्चवामन इतिकेशाः। मनीषाकौशल्यमदश्चोद्धु
रहंकारानं तुनत्य जिज्ञासवः विभाव। येसे हांतिका इति सिद्धांतः। संक्रांतोपमहल्लक्षणः। प्रयोजनमेषां नत्वन्यात्विकी जिज्ञासेति सुतस्याप्रयोजनमित्याधिकारे आगूय्यनेकेसिद्धस
न्ताः। आहताशुद्धविधेरिति। आहतांतः कोडीकृता। शुद्धविद्या शुद्धवेदनं तामन्विकोनुभवःस्त्यर्थः सानुभवत्यशुद्धविद्यायेस्तथ्योक्तैः। बहुमतजनकैरिति। नस्वबहूनां मतानां
तत्तद्दर्शनानां जनकैराकरैरित्यर्थः। प्रमाणैः मत्यक्षुंडकोपनिषदि। न तत्र सूर्यो भाति न चंद्रतारकामिमाप्रुक्तंतत्रक्षिं तेजः शक्तानां सात्त्वपात्रेद्रासके तेजो नरस्तुत चैतन्यामित्यर्थः।
आरंभाधिकरणे कारणे कार्यकारणयोरभेदप्रतिपादनेन परिणामोस्युपेयः सवकात्स्न्येन निर्णयेनेति। एवं च व्यापिन्वेशरीरसंबंधो नवेति। सिद्धस्वरूपो न वेति। वैषम्यप्रसक्तेर्जगतः
सुखदुःखादिसिद्धत्वोभवति। एवं च पूर्वोक्तविश्वहेतुत्वप्रतिपादकप्रमाणं पिहितावेवपथा सदेवसोम्येदमग्र आसीदेकमेवाद्वितीयं नेह्देक आद्धरसदेवेदमग्र आसीदेकमेवा

गो२

४४

द्वितीयं तस्मादस्तनः तज्ज्ञापमेकं तत्तु खलु द्वौ स्थैवं स्यादिति द्विवाचकथं न ततः तज्ज्ञापमेति सत्विदं सोमेदमग्र आसीदित्यादिषु स्वत एव द्विप्रतिपत्तौ सद सद्देत्यादि। प्रधानं
परमाणवो वा कारणं नित्यं।। कदाचिदक्रजोद्भूतस्या कदाचित्स्वद्रष्टयः स्यादित्यादि स्मृति स्मृतिवाक्यैरित्यर्थः। भवतेत्यिति। भातेर्द्वतुः। स्वात्मचक्रभ्रांतसकलविश्व
रूपतया शत्मगूढविश्व भ्रांतमित्यर्थः।। तथा दैवं प्रतत्त्वोपि त्वन्नेन पश्यंती हेत्वाह। मीमांसते। विचारणार्थान्मानूधातो मीमांसते बधेति सनंतानूकर्त्तरि लट्। विद्यारमंतितत्
तेन त्वा विश्रांतिं लभंते इत्यर्थः। अविश्रांतौ हेतुमाह। अन्योन्येति। परस्मान्नैश्व स्मोन्यं परस्परं कर्मव्यतिहारे सर्वनाम्नो द्वे स्त इति द्विरुक्तिः। समासवच्च बहुवचनारस्य
मा सपक्षेप्रथम स्यैकवचनं। स्पर्द्धिनः स्पर्द्धन शीलाः तार्किकाः प्रगतिनिःश्चयतस्तेपघनेनाकाशतः सृष्टिप्रपंचविनाय न्मया वायो वा स्पेभ्योपि प्रधानपरमाणुकारणत्वेनापि मिथ्या
कदाचिदिंगपास्ता भिमानवरणाच सिद्धांतपक्षपाताधाः पर्याप्तं विवदमाना इत्यर्थः। भवतो निरुक्त तत्त्वस्य न तत्त्वं स्वरूपमिति यावत्। यथार्थोनुभवमित्यर्थः। तत्कथमिति हेतुः। इदमं
सार एव लभेरन्। एतेष्विति। आत्मनेपदं प्रथमपुरुषबहुवचनं। न कथमपीत्यर्थः। उक्तं वक्रोध पुनि नैव स्तुंदरीमहिम्नः स्तुतो। सिद्धांतैर्बहुभिः प्रमाणगुणितेरन्यैर्विभ्रांतमोन
संचैरिवसर्वंसंधनमस्तना बन्ननिर्भिद्यते। यावन्न सविते वस्तन्त्रमिदं नोदेति विभ्रांतरेगंतो जन्मादि मोचनैक विशदं श्रीशंभविश्रीरिवेद इति। अत्र हेतुमाह। यतस्ते तत्त्वं स्वत
जइति। स्वतेज सा तैः सारार्थानि भूधातोः हरणादौ निष्पन्नं तेज स्तेन वस्तुमाणमोदाग्रपंचमतीतं। यद्वा स्वतेजः स्वप्रकाशं। सर्वातीत मवाङ्मनोविषयत्वात्। कोर्थः बस्प्रमाणवृथि
व्यादिभूतन्वयपीठशाब्दस्यादिकृतमद्वं भिन्नामहत्त्वपहूयेधान्निस्थितमिति। सिद्धांताश्च ब्रह्मादि विषमाइति भावः। तेच तदा परिहिण इतिसुतरां तन्मानुपपत्तिरिति तात्पर्यं। नदुक्तं।
अतीतं तु परं तेजः स्वसंविहृदयात्मकमिति। यतो वाचो निवर्त्तंते अप्राप्य मनसा सहेति। श्रुतिवीताबाङ्मनो विषयातीतं।। तेनतु वाङ्मनो विषया इति भावः। अत एव विकल्प
हरहितं। विकल्पः पूर्वोक्तः कोटिद्वयावलंबी अतिरात्रे षोडशिनं गृह्णत्येवन्न गृह्णते वा गृह्णनेनेतिसु तत्त्वाग्रह श्चाग्रहः। वस्तुमाणमानतर्कोप्यनुगुणोनामिति साधनभूतो

परम

राम

४४

८९

वैशेषिकाद्यभिमतो ग्रहः ॥ अर्थवादजन्ये नियमो नाम श्रुतिर्लिके ति ग्रहः ॥ कत्यतिग्रहा इति जरत्कारवार्तभागप्रश्ने अष्टौ ग्रहा अष्टावतिग्रहा इति याज्ञवल्क्योक्तास्ते च प्राणापानादिभिः एहि
तं यतः तं दिव्येहि वस्तुनि प्रमाणांतरसापेक्षे विकल्पस्य बाधस्य चावकाशः ॥ एवं कुतः यतः अजनं नाम तेरतिसून्यो मत्यादिपूर्व्यं ॥ तदुक्तं योगवासिष्ठे सर्वदा सर्वकृत्त्वं सर्व
त्मा परमेश्वरः ॥ आत्मेन त्वमितो भास्वानजो देवो निराश्रय इति ॥ अतः मानतर्कोपयोग्यमिति ॥ मानानि मीयन्ते मीयन्ते प्रमितिरिति वा प्रमा तत्करणानि वा प्रमाणानि तत्र सिद्धांतोप
योगीनि तदुक्तं मनीषिभिः ॥ तत्र प्रमाणं प्रमया व्याप्तं प्रमितिसाधनं ॥ प्रमा अर्थेवान्तव्याप्तोपयथार्थानुभवः प्रमा ॥ नित्यानित्यतया द्वेधा प्रमा नित्या प्रमाश्रयः ॥ प्रमाणमितरत्स्यात्तु कारण
स्य प्रमाणता ॥ अविसंवादि विज्ञानं प्रमाणमिति सौगताः ॥ अनुभूतिः प्रमाणं स्यात् स्मृतेरन्येति केचनेति ॥ अज्ञातचरितार्थत्वनिश्चायकमथापरे ॥ प्रमेयमाप्यमपरे प्रमाणमिति म
न्वते ॥ प्रमाणनियतं सामग्री प्रमाणं के विदूचिरे ॥ प्रत्यक्षमुपमानो व्यनुपमानं तथागमः ॥ प्रमाणं प्रविभज्यैवमक्षपादेन कल्पितं ॥ प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः
अनुमानं च तच्चापि सांख्याः शब्दं च ते अपि ॥ न्यायैकदेशिनोप्येवमुपमानं च केचन ॥ अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः ॥ अभावषष्ठान्येतानि भाट्टा वेदांतिनस्तथा ॥ संभवैति
ह्ययुक्तानि तानि पौराणिका जगुः ॥ आचारस्त्विति लिंगानि चालंकृतिविदो विदुरिति ॥ तर्कोठिरूपूर्वः संशयभेदः ॥ आदिशब्दादुपाधयो हेत्वाभासाश्छलजातिलक्षणं तेषामगम्यमवि
षयः ॥ अत्र विशेषणानां सापेक्षत्वेन वाक्यांतरत्वात् समासपुनरात्तत्वं न दोषः ॥ अगम्यमिति तु सर्वाद्वैतस्वभावोक्तिः ॥ तथा च तल्लक्षणं स्वं स्वं स्वभावस्य यथावस्तुवर्णनं
स्वभावोक्तिरिति ॥ सद्धीपदार्थस्य सर्वातीतत्वादुत्तरवाक्यार्थस्य तत्त्वालाभं प्रति हेतुत्वात् काव्यलिंगं ॥ सर्वातीतत्वादीनामुत्तरं प्रति हेतुत्वेन गुंफो कारणमालापि ॥ कथमीप्सित
त्वनकथमपीत्यप्रस्तुतार्थलाभादप्रस्तुतप्रशंसापि लक्ष्यं वस्तते ॥ ७ ॥ ननु सिद्धं तेन मयि दुर्लभं तत्त्वमन्येषां कथं सुप्रापमिति पाशंकां परिहरन् गुरुस्वचनप्रतीत्या प्रपंचपूर्ण
कृत्स्नैवस्वसंज्ञोतिः प्रकाशप्रबोधानलेवरणीत्तरे वेसंतर्जनं प्रपंचमार्गं वस्तुचयन्नाह ॥ धीराणां केचिन्महांतो गुरुवचनरतास्तत्क्रमं संसाराभावानिःशंका छोरविद्यापरिणत

परमतत्वं चास्य निरस्तनिखिलप्रपंचरूपत्वादित्ययोऽभाग गुरुवचनरताइति॥

सारभावाइति॥ अत एव स्वरूपः संसारस्य भावो ऽभिप्रायो येस्तथोक्ताः भावो लीलाक्रियावेशा भक्त्यभिप्रायजंतु इतिके

४५

नमः सर्वसंकल्पमुक्ताः स्वकारणपाद्रिरस्ताः पराः शिवतत्वाधारकाः पुरुषपापैः इत्याह त्यैविदीनांपरमरविभवं त्वोप्रपरवंशनिविद्यं हे परमशिवेति। तदुक्तं महाभा
रते। स्पृहयति यन्निर्मलसर्वार्थ्यानमुपक्रमं। शिवमित्युच्यते तस्मात् तस्मादेवः शिवः स्मृतः इति॥ गृहूतेनत्वमात्मीयमामीह सजगत्पृपित्ति तदुक्तं प्रमाणरीत्या सकलपाशं
परलपादनपहुरुरुत्तस्सवचनानितत्वमसीत्यादि महावाक्यार्थपर्यवसितानि पूर्वोक्तानि तेषु रताः श्रद्धया श्रद्धेयं माविश्वासेन तदर्थभूतमाचारं चरंत इत्यर्थः। निकृसं
संसारस्य बोक्तरीत्या त्वन्यत्वविभावनया निरस्तसंसारवासना इत्यर्थः॥ निःशंकाघोरविद्यापरिणतमनसइति। कुतः यतो निःशंकाविगलितशंको ऽसेषकलंका इत्यर्थः॥ शं
कापदेन सांहत्यपीईएणादयः पूर्वनिरूपिताः पाशाः लक्ष्यंते। तथा च श्रीमदेशिकेंद्रस्तनिष्प्रपंचं निरीक्षेतद्शाद्वैतविदं बुद्धि शीलमिस्तक्तरीत्यार्करुणभक्तिभाजामविद्या
सूत्रं विज्ञानरूपा स्फुरती समस्ता स्यामाभप्रपंचपामवावस्तमाणरीत्या श्रीदेवतामंत्रविद्याइतिहितंत्र सिद्धांतः। तस्यापरिगतामप्यात्मपादेर्ध्यादिपरिणामस्त्वघोरवि
घारेवतयोर्देशिकविद्यादेवतानां मात्मविद्या देवतदेशिकानां देशिकोक्तक्रमेणैक्यविभावनात्रद्रूपत्वलक्षणपरिणाममुपगता मनिर्बद्धियेषांतथोक्ताः॥ निःशंकाच्यु
तेरघोरविद्यापरिणतमनसश्चेति विग्रहः। तदुक्तं श्रीमदाचार्यैः समुद्भूतस्थूलस्तनतटपुरस्थारुहरितंकटाक्षैकर्ण्यैःकतिचनकदंबद्युतिवपुः हरस्तनद्भातिमनसिजन
यंतः सुवदनेभवत्यायेभक्ताः परिणतिरमी वामिथ्यमुमेरति। अर्थप्रश्नेपोलहस्यौमितिसके। सर्वसंकल्पमुक्ता इति। कुतः यतः सर्वेभ्यः संकल्पेभ्यः कलनात्मकेभ्यो मुक्ताः अपेत
चोदमुक्तपतिनापत्रलेः रत्नशद्निपंचमीसमासः संकल्पः कर्ममानसमिति कोशः। संकल्पराहित्येनैवमहाविद्यात्वेनपरिणता इत्यर्थः॥ तथा च छांदोग्यश्रुतिः। तानिहवाएतानि
संकल्पैकायनानि संकल्पात्मकानि संकल्पे प्रतिष्ठितानीति। सपाप्मामरेवेदमघतिरूपंसंकल्पयतीति सएवसपाप्मेति चाप्यपि स्मृप्यधियमानाः सहतः सुमेरुन्मूलनाद
पि। कुंभोद्भवजलपानादपि दुर्निग्रहमनो यदहइति। योगवासिष्ठोक्तरीत्या मनसो दुर्निग्राह्यत्वेनतसंकल्पोपरतिस्तथापितत्करणवलोकवर्तितानांसंकल्पराराधेतस्य

रामः
४५

८१

परिणतेन संहाराभिप्रायाद् विभीषाद् इत्यर्थः। अतएव महान्तः नहिमहतं न्यून

द्यात्वरिति। नवकाहरणप्रधानंपदद्वितिअवलोकनमित्यर्थः॥ शाकपार्थिवादित्वात्समासः॥ पयसूचितेशरःकरणपरत्वपायितिक्रियायाक्षुपचयेते। मयाद्दगंबुजेनेक्षतइत्याराववे
तनेपिसरोजेवीक्षणं किमारोपितलयोच्यत एवमंगपाकाव्युकुसुमेलेः॥ श्रीमराधा यामत्रपिद्दशाद्रावीयसादरदलितनीलांबुजरुचारवीर्यासंदीर्नस्वपयकुपयामामपिपिशिवेइति।
नहिद्दग्यालपनंसंभवति। तेनोभमत्रापितद्यमवलोकनंफलितं। तस्यास्तायेनं तथोक्ताः॥ लक्षणात्तियाठलुलक्षणद्दस्मानरुक्षिंगतपालक्षणीतिस्यात्॥ पुल्लिंगसत्वेपिनर
सांविनाप्रतिकूलपरहतिनिवारणंस्यादित्यपपाठः॥ वस्तितिचात्रक्रोधमुनिः॥ स्वत्काहरणपाचिरस्वापरिविहितभमात्वांप्रमांनीति। अत्रश्रुतिः। यमेवैषवृणुतेतेनलभ्यइति। सनोवुध्यायु
भ्यासंयुनक्तिनिर्दयोयत्तानमन्त्रिच्छेदित्यादिश्रुतिस्मृतिभिस्तत्रसादैकलभ्यत्वप्रतिपादनादित्यर्थः॥ रक्षाणामभेदलक्षणविपक्षसंकदोत्रारणंपरमिहात्मरक्षणमित्यमृतानंद
मुनिप्रवरोक्तरीत्याप्रतिकूलपरत्वाद्युपरहतिनिवारणं। प्रतिकूलपदार्थास्तुतत्रतत्कल्याएवतेषांत्वदनुग्रहतोनुद्भवेनिस्तरंगेपनासितत्वनएवविघात्वेनपरिमाणापेक्षामित्याहुः। धी
रारति। महाशयाइत्यर्थः॥ अत्रैवाजसनेयीश्रुतिः॥ विरजःपरआकाशादजआत्मामहान्ध्रुवः॥ तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः॥ नानुध्यायेद्बहूञ्छब्दान्वाचोविग्लापनंहितदि
तिकोर्थः॥ भवानीशंकरौवंदेश्रद्धाविश्वासरूपिणौ। याभ्यांविनानपश्यंतिसिद्धाःस्वांतस्थमीश्वरमित्यभियुक्तरीत्याश्रद्धाक्रीशांविधिपुरःसरमाम्नायाधिगमेश्रद्धाविश्वासाभ्यां अत्र
न्यस्त — मातश्रादेशेनेतिनेत्यर्थः। सत्यघनामधेयंसतस्यसत्यमितिप्राणावेसत्यंतेषामेषसत्यमितिवाजसनेयिश्रुत्या। अपारावारविस्तारसंवित्सलिलवन्नेः॥ विदेकार्णवएवायंस्वयमात्मा
विर्भवतइतिमोगवासिष्ठोक्तप्रमाणेनवचनगृहत्यनिस्तरंगबोधैतनएवविश्वोल्लासर्मवुतरंगन्यायेनतन्मयतानुभवेनानासिद्धांतजलमुक्तिकल्लोलेः॥ ज्ञायमानाश्चप्पप्सुवाइत्यर्थः
॥ तेष्वपिकेचिन्नसर्वेतिवाधकाः॥ प्रपंचयजनकाः॥ वक्ष्यमाणषडन्वयेतमपीतिनोवासाधकाइत्यर्थः॥ अत्रसंसिध्यर्थराधधातोराडपूर्वसरूतिपुराणराधकाः॥ भवत्साधकाइत्यर्थः॥ अत्रसंसि
प्रर्थेराधधातोर्भवत्साधकाइतिपाठेभवतःसर्वस्मात्परत्वभासमानस्तवसाधकाआराधकास्तेनेदंप्रयुज्यते। तदुक्तमागमकल्पद्रुमे॥ अथयहोमंत्रवस्वामिनेपनचिन्मयतांव्रजेत्। आत्मानमपरिछि

लंजातीयात्साधकोत्तमः॥ आत्मानंराममूपरमहानात्मनः प्रकीर्तितः॥ एतद्रूपं तु चित्रूकं उंचतरत्वं विभावयेत्॥ आनंदमेवलंरम्यं विंडत्रिवलमान्विर्तं॥ अद्धमात्रायो
निहृत्यं ब्रह्मानंदमयं तथा॥ परदेवमयेसर्वदानदेवप्रपूजिते॥ संविग्धौ प्रभुरूपात्साधकःस्थिरमानसः॥ ग्रहार्थभावकारूपमक्षरंतुविराजितं॥ अत्तरागिछगात्मत्र
निःशब्दाब्रह्मराशयः॥ इति विश्वस्य वैखरी मध्यमा चक्रको॥ शिवरामजानस्य सर्वास्य प्रकृतावकारणीभूतो संविदभ्योवाऊतिविभावनात्रूपं पुण्यपापैर्विहीनः इति॥ अनएव
पुण्यपापैः कृत्याकृत्यैः साहचर्यात्ह्मधर्मैः संकल्पविकल्पैश्च॥ तदुक्तं तत्रैव॥ कृत्याकृत्यं पापपुण्यं संकल्पविकल्पकौ॥ धर्माधर्मौ साधके द्वौ हविष्ठेन प्रकल्पयेत्॥
चिदग्नौ जुहुयान्मंत्री मूलांतेन यथाक्रममिति॥ तैर्विहीनाः रहिताः अत्ताराकृतेरुत्तरमेषां पूर्णाहुतिद्रव्यतयोदितत्वादित्यर्थः॥ परेभ्योपिपरः परतरः सर्वोत्कृष्टः विभवो विभू
तिर्यस्य तथोक्तः॥ परत्वं चास्य विश्वविग्रहेतिपदव्यात् तथा च छंदोगश्रुतिः॥ ठद्वयं तमसस्परिज्योतिः पश्येम उत्तरमिति॥ कूर्मपुराणेपि॥ सर्वेंद्रियेभ्यः परमं मन आहुर्मनीषिणः॥ म
नसश्चाप्यहंकारमहंकारान्महान्परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥ पुरुषाद्भगवान्प्राणस्तस्य सर्वमिदं जगत्॥ प्राणात्परतरं व्योम व्योमातीतोग्निरीश्वर इति॥ त्वां विश्वं
पश्यंति॥ पूर्वोक्तरीत्या विश्वस्य त्वन्मयात्मरूपतामनुभूयत्वामेव विश्वतया भावयंतीत्यर्थः॥ नवा त्वत्तोन्यदस्तीति भावः॥ तथा चकौषीतकिश्रुतिः॥ विश्वं देवा मुदगादि
तीकमिति॥ कूर्मपुराणेपि॥ नास्ति मत्तः परं भूतं मां च विज्ञाय मुच्यत इति॥ अत्र धीरा इत्यादि विशेषणानामन्योन्यं कारणत्वात् गुंफात्कारणमाला॥ सा भित्रायतमा परिकरः॥ पूर्व
वाक्यार्थस्य पूर्वं हि पत्रादृष्टो हेतुतया काव्यलिंगमपि॥ त्वां विश्वं प्रपश्यंतीत्यनन्यगतिनिरूपकतिरश्चीनोक्तिस्पष्टप्रकृतिभगत्वैवसापद्धवामनेति॥ पुण्यपापैर्दिहीना इति स्पष्टं
तयर्जनार्थसूचनामुद्रापि॥ ९॥ संप्रत्येकेन निगमपरस्त्वमापन्नपूर्वं विवक्षितविषयं प्रमेयं प्रार्थ्यते॥ सिद्धांतः संभवो यः शिवगुरुवदनाद्यो॥ विद्यास्त्रोकेः स्तोत्र्यात
न निर्वाह्यत इति भवतः श्रीविभोव्यापलं तं॥ अत्रनन्तानातिरेकोक्तिजे निममस्कृतत्सम्यता॥ सबुध्यानवित्रस्य प्रमेयस्युपदिश्यपरं मातृकावगराश्रे॥ हे विभो व्याप

निर्गहिपदाभिप्रेतमिति॰ ननु तावता किं तत्राह॰ अत्रेति॰ द्वयं सार्थ्यये॰ अत्रत्या इति ५

काऽनेन न विभुवस्तुन स्तुतिस्तु अप्रस्तुतपरिच्छिन्नविषया निर्दिष्टेति भावः॥ ननु कुतो विभुत्वमत आह॥ शिवेति॥ तदुक्तं योगवासिष्ठे॥ न देवो देहरूपोऽस्ति न देवश्चित्तरूपकः॥ अकृत्रिम
मनाद्यन्तं देवत्वं च शिवं विदुरिति॥ योवक्तुमिष्टः शं भवः शंभोरयं ननु शैवाः सिद्धान्ता स्वांस स्तन्त्रे कोऽयमित्यत आह॥ गुरुवनाद्योऽविद्यास्योकेऽइति॥ गुरूक्तलक्षेण स्तसमुस्कान्न
तुष्मास्त्वादितः॥ तदुक्तं गूढार्थदीपिकायां॥ पारंपर्यविहीना ये ज्ञानमात्रेण गर्विताः॥ तेषां समयलोपेन किं कुर्वन्ति मरीचयः इति॥ अघोर विद्या निरुक्तलक्षणा तस्या अक्षरैर्भावार्था
दिनिरूपणद्वारोक्तः सिद्धान्तः संप्रदायेन क्रमागतिकयोपलब्धो निश्चयः॥ श्रुत्यादिविप्रतिपत्तिनिरासपूर्वं भवतो निरुक्तत्वस्य॥ स्तोत्रव्याजेन लक्ष्येण॥ व्याजोपदेशौ लक्ष्यं चेति कोशः॥ दे
शकालाकारैरनाकलितस्यानादेरस्य अप्रगृह्यस्तुतः स्तुतिर्वा विधेस्त्वो चापः॥ निवासेनेवाहृत्यतेः कर्मणि लट्॥ यथा कथंचिन्निरूप्यते न ध्याकल्प्येनेति व्याजेन शं भवति इति तनि
बोहा॥ सतुभ्यारोस्तशवकृ त्वायामिति धातोर्निष्पन्नो दासोपंकहृदस्वसादिति बुध्य॥ अत्र सहतुनः पुनः पुनः न्यूनातिरेकोक्तिजनितं न्यूनमूनमतिरेको धिकं॥ अतिरिक्तः समधिके इति कोशः॥
न्यूनातिरेकावस्यास्ताशस्ताग्बुक्तिः अतया॥ न्यूनत्वं तावद्विधोविभूत्याप्रतीकादिरूपया॥ अधिकं तु नादृशेतिर्दिश्येनिराकारेतौ दृष्टो माद्युपरक्तिरूपया तन्निनतुष्मादितं मे चापलं
चपलस्य भावः सम्पन्नं॥ सोढव्यमित्येकं हे मातृकावर्गराशे॥ यानि नानानाम अपरपंचरूपेणेदमखिलमिति मातृका॥ अकारादिक्षकारान्ता ह्ययं शास्त्र इत्यालिनी इति॥ तेषां राशेः पुंजयथ
पि मातृकाः स्कंध॥ इमि विवेचनेवस्त्रमाणभूगलिपिक्रमेणापि विभक्ता स्तम्या॥ पित्रपि पृष्ठे भूता इति अमेयोपदेशाय समुदीक॥ त्वमुचितमेवेत्यर्थः॥ यतस्त्वं मातृकावर्गराशिरतो
नाहं न हतभेदेन मे चित्तस्थितस्त्वं॥ अभवाजसनेयिश्रुतिः॥ एषत आत्मान्तर्याम्यमृत इति॥ प्रमेयमभिधेयं स्मृपरिशात्वसिद्धान्तनिरूपणानुगुणमर्थजालमस्योपदिशेत्यर्थः॥ अलंका
रस्तु समुच्चयः॥ मातृकावर्गराशेइति पदेनोपदेशसमर्थ्यनिलक्षणं काव्यलिंगमपि॥ प्रथमान्तविशेषणविशेष्यसाभिप्रायत्वनिरूपितोपरिकरांकुरावपि॥ ८॥ अथोपोद्घातप्रकरण
समाप्तिं सूचयति॥ इत्युपोद्घातप्रकरणं॥ इति शब्दः प्रसंगपरिसमाप्तिपरः इति हेतुप्रकरणप्रकर्षादिसमाप्तिद्योतिको वा॥ उपोद्घातस्य॥ उपोद्घात उदाहार इति कोशः॥ उपोद्घा

तकारान्ता वर्णरूपा तस्या॥ अद्यावरूचटतपयशाः॥

अवच्छेदकस्य समवसरः। यथा अत्रैव प्रतिबंधिकायाः परस्परस्य व्यवच्छित्ति जिज्ञासाया निवृत्तौ ५
एककार्यप्रयोजकत्वं यथा अत्रैव ध्यानांतर्भजनयोः नचात्र तथा संभवः ५

४०

